Poona Oriental Series No. 60

॥ क वी न्द्र च न्द्रो द य: ॥

KAVĪNDRACANDRODAYA

[A collection of addresses presented to Kavīndrācārya by some of his contemporary scholars during Shah Jehan's Reign]

CRITICALLY EDITED BY

Vidyāsudhākara PANDIT HAR DUTT SHARMA, M. A., Ph. D.

Professor of Sanskrit, Hindu College, Delhi

AND

M. M. PATKAR, B. A.

Bhandarkar Oriental Research Institute, Poona.

POONA :

ORIENTAL BOOK AGENCY

1939

Printer—S. R. Sardesai, B.A., LL.B., Navin Samarth Vidyalaya's
Samarth Bharat Press, 41 Budhwar, Poona 2.

Publisher :—Dr N. G. Sardesai, L.M. & S. for the Oriental Book Agency,
15 Shukrawar, Poona 2.

INTRODUCTION[1]

1. *Manuscript Material.* The present edition of the Kavīndracandrodaya, published for the first time, is based on three Mss, two of which were acquired from the Royal Asiatic Society of Bengal Library and the third from the Bombay Branch of the Royal Asiatic Society, Bombay.[2] The description of the three Mss is as under :—

(*A*) "Substance, country-made paper, $12 \times 5\frac{3}{4}$ inches. Folia 49. Lines 8 on a page. Extent 1,053 ślokas.[3] Character Nāgara. Date ? Place of deposit, Calcutta, Government of India. Appearance, fresh. Prose and verse. Very incorrect" (=No. 4145, Notices of Sanskrit Mss. by R. Mitra. Vol. X. p. 263).

(*B*) "Substance, country paper, $11\frac{1}{2} \times 4$ inches. Folia 31. Lines 10 on a page. Extent, 900 ślokas.[3] Character, Nāgara. *Date S-1734.* Place of deposit, Calcutta, Government of India. Appearance, old. Prose and verse. Incorrect." (=No. 815, Notices of Sanskrit Mss. by R. Mitra, Vol. II).

(*C*) "$13\frac{1}{2} \times 8\frac{1}{2}$ inches ; Devanāgarī hand-writing. Foll. 22 ; about 18 lines to a page. (=No. 1165 B. B. R. A. S. Des. Cat. Vol. II p. 263)." This is a recent copy and not very accurate.

2. *The Anthology.* When the pilgrim tax was abolished by Emperor Shah Jehan at the request of Kavīndrācārya, the joy of Hindu India knew no bounds and congratulations poured from all quarters. Addresses after addresses, verse and prose-eulogies were presented to the Sanyāsin, the Defender of the Faith. Titles of Kavīndra, Vidyānidhāna and Ācārya were conferred upon him.

---

1. The major portion of the facts discussed here is dealt with by Dr. Har Dutt Sharma in his article "A Forgotten Event of Shah Jahan's Reign," published in the Kuppuswami Commemoration Vol., 1936, pp. 53–60.

2. The editors are thankful to Mr. P. K. Gode, M.A., Curator of the Bhandarkar Oriental Research Institute, Poona, for procuring the Mss. from the above two libraries for editing purposes.

3. The extent includes the number of prose passages also.

These addresses in prose and verse along with the names of their authors who were scholars of repute or holy men have been preserved for us by Śrīkṛṣṇa Upādhyāya in an anthology (padyāvalī) called the *Kavīndracandrodaya*. It is, however, difficult to say whether the people who contributed to the anthology were the inhabitants of Allahabad or Benares or people who had aasembled at one of these places on the occasion of some bathing festival. A few quotations are given here:

" यवनकरग्रहणाब्धौ मग्ना येनोद्धृता पृथिवी ॥ " Verse—7

" चक्रेण मोचयांचक्रे नक्राच्छक्रानुजो गजम् ।
प्रयागेभं करग्राहात् करग्राहात् कवीन्द्रवित् ॥ "—103

श्रीस्वामिनः ।

" येन श्रीसाहिजाहानरपतितिलकः स्वस्य वश्यः कृतोऽभूत्
किं चावश्यं प्रपन्नः पुनरपि विहितः साहिदाराशकोहः ।
काशीतीर्थप्रयागप्रतिजनितकरग्राहमोक्षैकहेतुः
सोऽयं श्रीमान्कवीन्द्रो जयति कविगुरुस्तीर्थराजाधिराजः ॥ "—169

हीरारामकवेः ॥ etc.

3. *The Author or Compiler.* It has already been stated that the addresses presented to Kavīndra in prose and verse by different pandits were collected together by one Śrī Kṛṣṇa Upādhyāya in a book-form. The author's name is given in a verse which reads as follows :—

श्रीमत्काशिविकाशिभिः सुकविभिस्तद्वत्प्रयागासिभि-
र्नानादेशनिवासिभिश्च रचिता विद्याग(गु)णोल्लासिभिः ।
श्रीकृष्णेन सरस्वतीपदयुताचार्योपनामाश्रित-
श्रीविद्यानिधिसत्कवीन्द्रविषया पद्यावली लिख्यते ॥ 9 ॥

It will be evident from the above verse that the author or compiler, who is also a contributor to the anthology is, Śrī Kṛṣṇa. Rajendralal Mitra is, therefore, wrong in attributing the authorship of the work to Kavīndra himself. Unfortunately no record of the compiler of these valuable adresses is available and hence nothing more can be said about him at present.

4. *Kavīndra, His Personal History.* Ācārya Kavīndra or Kavīndra (which is only a title) was originally an inhabitant of a place called Puṇyabhūmi on the banks of the river Godāvarī.

In his *Kavīndra-Kalpadruma* he states that he lived on the banks of Godāvarī, and having learnt the Veda and the Vedāṅgas along with other śāstras he took to asceticism and commenced meditation of Brahma. Cf. The following lines :—

"गोदातीरे प्रमोदावलिबलिततमे जन्मभाक्पुण्यभूमाव[1]—
ऋग्वेदी वेदवेदी जगति विजयते श्रीकवीन्द्रो द्विजेन्द्रः ॥
अधीत्य वेदवेदाङ्गकाव्यशास्त्राणि सर्वशः ।
ततः स्वीकृत्य संन्यास ब्रह्माभ्यासं समाश्रितः ॥ ३ ॥"[2]

"He had studied the Āśvalāyana Śākhā of the Ṛgveda and had mastered other branches of learning also. In his very childhood he lost his interest in the world and having taken Sannyāsa made Benares his abode. The Sannyāsī must have met Shah Jehan when the persecution of Hindus was at its highest and the tax was re-imposed on pilgrims to Allahabad and Benares. The Sannyāsi seems to have exercised wonderful influence on the Emperor in order to make him abolish the tax."[3]

Kavīndra was a learned man as is evidenced from the fact that he was the head of the Pandits at Benares. He was well

---

1. Mr. G. K. Srigondekar, M.A., of Baroda regards Kavīndrācārya's birth-place to be पण्यभूमि i.e. a market-town on the banks of the Godāvarī. He is of opinion that पण्यभूमि is the correct reading (G. O. Series No. XVII P. S. p. 1). पुण्यभूमि, however, appears to be the correct reading to us. Kavīndra must have been born in some holy place (perhaps Nasik ?) on the bank of the river Godāvarī and then he must have migrated to Benares. This reading has also the support of two Mss. Unless it can be proved that पण्यभूमि is the proper name of a place, there is no sanction to change the Ms. reading. Moreover, if the name पण्यभूमि or पुण्यभूमि merely describes the place, (and is not a proper name), then it is more in the fitness of things that Kavīndra was born at a holy place than at a market town.

2. I. O. Cat. pt. VII. No. 3947.

3. MM. Harprasad Shastri gives the following account of the abolition of the pilgrim tax by Shah Jahan.—"He (Kavīndra) journeyed to Agra with a large following and proceeded to the Diwan-ī-am and there he pleaded the cause of the Hindu pilgrims with so much force of eloquence that all the noblemen of the court from Irāk, Iran, Badakshan, Balkh etc. were struck with wonder. Shah Jahan and Dara Shikoh relented and abolished the tax. That was a day of great rejoicings throughout Hindu India. It was on this occasion that the title of *Sarvavidyānidhāna* was conferred on him....." (Indian Antiquary, Vol. XLI, 1912 p. 11.)

versed in all the branches of Sanskrit learning such as Nyāya, Sāṁkhya, Vedānta, Mīmaṁsā, Vyākaraṇa, Jyotiṣa and so on. His wonderful collection of Mss[1] also reveals this fact. He had himself written commentaries on several Sanskrit works. The title Sarvavidyānidhāna conferred on him by Emperor Shah Jehan also shows his proficiency in all branches of learning.

Pilgrim Tax. It is recorded in the chronicles of Shah Jehan's period that he took severe action against his Hindu subjects in 1632. " Jahangir had raised no objection to the erection of new temples which is opposed to strict Mohamedan law. Shah Jehan now resolved to put a stop to the practice and gave orders that—at Benares, and throughout all his dominions in every place, all temples that had been begun should be cast down. It was now reported from the province of Allahabad that seventy-six temples had been destroyed in the district of Benares. No record of destruction in other parts of the empire has been preserved, but it must have been considerable."[2]

But nowhere do we find any record that Shah Jehan had imposed pilgrim tax on the pilgrims to Benares and Allahabad. It may be asked why this fact which is detrimental to Hindus is not recorded by Muslim chroniclers. The answer to it is that at the intercession of the great Sannyāsin scholar Ācārya Kavīndra Sarasvatī Vidyānidhi, this tax was remitted. So, if it were only the re-imposition of pilgrim tax it would have been recorded, but as it was its remission, who would record an event which shows weakness on the part of the emperor to accede to the request of the Hindus !

5. *Literary Estimate of the Anthology*. The addresses evince great literary merit of the various authors. References to Vyākaraṇa, Nyāya, Sāṅkhya, Jyotiṣa, Vedānta, Mīmāṁsā, etc. are scattered in many verses. Passages in prose show high standard. Of course, one of them is a direct plagiarism from the Kādambarī.[3] The longest contribution comes from the pen

---

1. Vide कर्वान्द्राचार्यसूचीपत्र published by the Baroda Govt. in the G. O. Series, 1921.

2. Smith : *India in the Muhamedan Period*, p. 396.

3. Cf. passages 1–34 on page 25.

of Paṭṭavardhana Mahādeva Bhaṭṭa, who shows great mastery over the technique of prosody. He has contributed a number of stanzas in Marathi also. Of course, his exuberance is due to selfish interest, and in one of the verses he actually begs his patron to give him two-hundred rupees. It is a pity that nothing definite is known about the authors or their literary activities. We hope that this edition will prompt some scholars to throw light on this dark period of Sanskrit activity.

6. *Authors or Contributors.* The importance of this anthology lies in this fact also that it has preserved for us the names of many contemporary writers. It helps in fixing the dates of many and at the same time throws light on the vigorous literary activity of the Hindu scholars in the various fields of Sanskrit literature. The anthology mentions sixty-nine names of contributors including Srī Kṛṣṇa Upādhyāya. Out of these 69 names we give below a tentative identification of about 24 and the names of the rest.

1. *S'rī Kṛṣṇa Upādhyāya.* The compiler of the Anthology. Nothing further known. Verses 1–35.

2. *Mahārāja Miśra.* Mitra reads *Hemarāja Miśra.* Verses 36–40.

3. *Jayarāma Bhaṭṭācārya.* = Jayarāma Nyāya-pañcānana Bhaṭṭācārya, pupil of Rāmabhadra or Rāmacandra Bhaṭṭācārya, guru of Janārdana Vyāsa. (C.C. I, 201a). He is the author of Kāvyaprakāśa-ṭīkā named Tilaka or Jayarāmī. (De: Sanskrit Poetics, I, 176–7). He also wrote the Nyāyasiddhāntamālā, the Padārthamaṇimālā and commentaries on Nyāyakusumāñjali and Tattvacintāmaṇidīdhiti. Dr. De places him later than the 16th and earlier than the 18th century A.D. So, he can now safely be placed near about 1632. Verses 41–44.

4. *Mādhavabhaṭṭa.* Verse 45.

5. *Rāmadeva Bhaṭṭācārya.* Son of Viśvanātha Pañcānana Bhaṭṭācārya. The latter wrote a commentary on the Nyāya-sūtras of Gautama in 1634 and is the famous author of the Bhāṣāpariccheda, Siddhāntamuktāvalī, etc. (C.C.I, 584b; Winternitz: Gesch. d. Ind. Litt. III, 475). Verses 46–47.

6. *Kūrmācala Vireśvara Paṇḍita.* Verses 48–50.

7. *Khaḍgamiśra.* Verse 51.

8. *Raghunandana Dviveda* = Raghunandana Dīkṣita, father of Kṣamānanda. See No. 10 below. Verse 52.

9. *Raghunātha Dīkṣita.* Verses 53–54.

10. *Kṣamānanda Bājapeyin.* Son of Raghunandana Dīkṣita (See No. 8 above) and the author of Nyāyaratnākara and Sāṁkhya-tattvavivecana, a comm. on Tattvasamāsa, published in the Chowkhamba Sanskrit Series, No. 246 (Sāṁkhya-saṅgrahaḥ; C.C. I., 135). The editor of Sāṁkhyasaṅgraha, P. Vindhyeśvarī Prasāda Dvivedī, reads his name as Ṣimānanda and remarks :—**अत्र क्षेमेन्द्रेणेत्यनुमीयते। 'षिमानन्द' इति तु मातापित्रोरुल्लापने नामेति सर्वजनप्रसिद्धार्थं तथैव लिखितमिति सभाव्यते.**

The first verse of the Saṁkhya-tattva-vivecana is :—

रघुनन्दनसुतेनेदमिष्टिकापुरवासिना।
कान्यकुब्जद्विजाग्र्येण षिमानन्देन तन्यते ॥

Bājapeyin is one of the titles of Kānyakubja Brahmins. Verses 56–60.

11. *Bhaiyyābhaṭṭa* or *Bhayyābhaṭṭa* is also quoted in the Sūktisundara, an anthology by Sundadaradeva (Ms. No. 1237 in the Catalogue of Sanskrit Mss., B.B.R.A.S.). He is the son of Bhaṭṭāraka Bhaṭṭa and the author of Dharmaratna (C.C.I, 416). The Ms. No. 1254 (Baroda O. I.) is Āhnika-dīdhiti from Dharmaratna (Kane : Hist. Dharm. Lit. I, 719a). Verses 61–62, 273–80.

12. *Keśava Miśra.* Probably he is identical with the author of Alaṅkāraśekhara and lived under Māṇikyacandra, son of Dharmacandra, grandson of Rāmacandra. Māṇikyacandra came to the throne of Koṭ Kāṅgra in 1563 A.D. "The literary activity of Keśava may, therefore, be fixed in the 3rd quarter of the 16th century A.D." (De : Sanskrit Poetics, I, 261 ; C.C.I., II, 28). We think his time should be fixed in the last quarter of the 16th and the early part of the 17th century A.D. It is just possible that he was an old man when he wrote his eulogy about Kavīndra. Verses 63–66.

13. *Siddheśvara Bhaṭṭa Mīmāṁsaka*, son of Dāmodara Bhaṭṭa, grandson of Śaṅkara Bhaṭṭa and the author of Saṁskāra-bhāskara or Saṁskāramayūkha and Saṁskārāmṛta About 1630–1670 A.D. (Kane : Hist. Dharm. Lit.I, 756, C.C.I, 723b). Verses 67–68.

14. *Cakrapāṇi Paṇḍita*, probably identical with Śeṣa Cakrapāni, pupil of Vīreśvara or Viśveśvara and author of Kārakatattva (Gr.) (C.C. III, 38a). Verses 69, 100, p. 26.

15. *Gaṇeśa Bhaṭṭa Dharmādhikārin*, author of Vyavasthāsaṅkṣepa (C.C.III, 31). Verses 70–72, 172–73.

16. *Nāgeśa*, son of Somarāja Paṇḍita. Can he be identified with the author of Śrāddhendu-śekhara (C.C. II, 207a)? We come across only one Somarāja in Aufrecht's C.C. (different from Somarājadeva) who is the son of Nṛhari or Narhar and the author of Darśapūrṇamāseṣṭi and Rudrasūktabhāṣya (C.C. II, 235a, and III, 151b). Verses 73–76.

17. *Parameśvarācārya*. Verse, 77.

18. *Rāmakṛṣṇa Nāgara* is most probably identical with Rāmakṛṣṇa Dīkṣita Nānhābhāi, son of Dāmodara, who copied Tṛisthalīsetu at Benares in 1616. He is the author of several works quoted in C.C.I, 509a. Verses 78–80.

19. *Viśvambhara Maithilopādhyāya*. Verses 81–82.

20. *Jagadīśa Jānika*. Verses 83–85.

21. *Rāmeśvara Pañcānana Bhaṭṭācārya*. Verses 86–87.

22. *Jayakṛṣṇa Upādhyāya*. Verses 88–89.

23. *Gaurīpati Miśra* is most probably identical with Gaurīpati, son of Dāmodara, who wrote at Benares in 1640 a comm. on the Ācārādarśa of Śrīdatta (C.C.I, 172a ; Kane : Hist. Dharm. Lit. I., 696a). Verses 90–91.

24. *Nīlakaṇṭha Ācārya* = Bhaṭṭa Nīlakaṇṭha ? (C.C.I, 301b; Kane : Hist. Dharm. Lit. I. 438ff.). Verse 92.

25. *Dāmodara Bhaṭṭa Kāla*. Verse 93.

26. *Viśvanātha Jyotirvid* = Viśvanātha, the fifth son of Divākara Daivajña, wrote between 1612—1632. He is the author of a legion of works (C.C.I, 584a). Verses 101, 272.

27. *Dharmeśvara Agnihotrin*. Verses 94—97.

28. *Dāmodara Upādhyāya Maithila*. Verses 98–99.

29. *Vrajabhūṣaṇa Kavi*. Verses 102, 201.

30. *Śrī Svāmin*. Verse 103.

31. *Kṛṣṇacandra Bhaṭṭa*. Verse 104.

32. *Bālakṛṣṇa Tripāṭhin*. Son of Kāśīrāma of the Mahārańga family ; wrote Guṇamañjarī on Prāyaścittaviveka. (Kane : Hist. Dharm. Lit. I, 714b ; C.C.II, 183b). Verse 109.

33. *Aniruddha Miśra.* Verses 110–111.

34. *Bālakṛṣṇa Jyotirvid* = Bālakṛṣṇa of Jambūsaras, son of Yādava, son of Rāmakṛṣṇa, son of Nārāyaṇa, son of Rāmjit and author of Jātakakaustubha, Jaiminisūtrabhāṣya (jy), Tājikakaustubha, Yoginī-daśākrama and several stotras. (C.C.I, 370b) Verse 112.

35. *Pūrṇānanda Brahmacārin.* Verses. 113–119.

36. *Muralīdhara*, grandson of Kālidāsa Miśra. Verses 120–127.

37. *Kṛṣnācārya.* Verses 128–137.

38. *Mahādeva Paṭṭavardhana.* Verses 138–155, prose passages and Verses. 227-268.

39. *Līlādharabhaṭṭa*, Verses 156–167.

40. *Badarīnātha Upādhyāya Maithila.* Verse 168.

41. *Hīrārāma Kavi.* Verses 169–171.

42. *Mauni Viśveśvara Bhaṭṭa.* Same as Gāgābhaṭṭa ? (Kane : Hist. Dharm. Lit. I, 742.) Passages 1–34 on p. 25—A plagiarism from Kādambarī, Cf. Dr. P. L. Vaidya's edition, Poona, pp. 44-45

43. *S'rī Mahīpati Upādhyāya.* Verses 182, 189–90.

44. *S'ivadatta Miśra*, son of Caturbhuja, author of Śivakoṣa, written in 1677 and Saṁjñāsamuccaya(med.). (C.C.I, 649a). Prose passages 1–14 on p. 26.

45. *Kaviśekhara.* Also quoted in the Padyāvalī. Dr. De remarks : "This is an honorific title which is found adopted by several poets, e.g., Jyotirīśvara and Vidyāpati of Mithilā and by the Vaidya author of a Haravilāsa Kāvya (Eggeling, India Office Catalogue, vii, p. 1450), who describes himself as the son of Yaśaścandra." (The Padyāvalī of Rūpa Gosvāmin, edited by S. K. De, Dacca University, 1934). Verse 183.

46. *Bhūdhara Pāṭhaka*, same as the father of Prabhākara who wrote Gītarāghava in 1617 (C.C.I, 414-b). Verses 184–187,191.

47. *Raghunātha Upādhyāya*, probably the son of Bhānuji of Śāṇḍilya Gotra and author of Prayogatattva composed at Benares, in 1656 A.D. (Kane : Hist. Dharm. Lit. I, 726a). Verses 188.

48. *Lakṣmaṇa Mahāpātra.* Verses 192–193.

49. *S'rīsvāmiśiṣya.* Passages 1–34 on p. 28.

50. *Tilabhāṇḍeśvara*. P. 29.

51. *Brahmendra Sarasvatī*, pupil of Devendra and the author of Vedānta-paribhāṣā, (C.C.I, 389a) and Advaitāmṛta (C.C. II, 88a). p. 29.

52. *Brahmendrasvāmin*. p. 29.

53. *Nārāyaṇa Caturveda*. Verse 195.

54. *Bhānabhaṭṭa or Bhānubhaṭṭa*, son of Nīlakaṇṭha Bhaṭṭa, son of Śaṅkara-Bhaṭṭa. (1620–80). Author of Ekavastrasnāna-vidhi, Dvaitanirṇaya-siddhāntasaṅgraha and Homa-nirṇaya. (C.C.I, 405a ; Kane: Hist. Dharm. Lit. I., 708a). Verses. 198–199, 205.

55. *Tailaṅga Vaikuṇṭha Bhaṭṭa*. Verses 196–197.

56. *Gaṅgārāma Miśra*. Verse 206.

57. *Jagannātha Pañcānana Bhaṭṭācārya*. Passages 1–9 on p.32.

58. *Maithila Kāyastha* (probably the same as No. 43.) Verses 209–210, 269–70.

59. *Gurjarasya*. Verse 211.

60. *Svāminaḥ*. Verse 212.

61. *Dayālumiśra*. Verses 213–219.

62. *Vīreśvara Bhaṭṭa*, most probably identical with the author of Anyoktiśataka (Kāvyamālā, 5th Gucchaka) where he calls himself the son of Hari of Mudgala gotra. Passages 1–4 and verses 281–82. The last verse of his work is—"

"योऽभूद् द्राविडचक्रवर्तिमुकुटालंकारभूतस्य रे
मौद्गल्यस्य हरेः सुतः क्षितितले वीरेश्वरः सत्कविः ।
तस्य प्रोद्गतसूक्तिनिर्मलसुधाशुद्धान्तरस्य क्षणात्
एषा निर्मितिरुत्तमा मतिमतां नित्यं मुदे जायताम् ॥ "

63. *Kamalanayana Dīkṣita*. Passages 1–15 and Verse 220.

64. *Brahmagiri*. Passage and Verse 221.

65. *Tvaritakavirāya or Tvaritagatikavi*. Verses 222–223.

66. *Rāmabhadra Bājapeyin*. Verses 224–225.

67. *Mauni Raṅganāthabhaṭṭa*, Verse 226.

68. *Divākara Bhaṭṭa*. Verse 271.

69. *Raghunātha Bhaṭṭa Gurjara*. Verses 319–326.

N.B.—C.C. = Catalogus Catalogorum of Aufrecht
Hist. Dharm. Lit. = History of Dharmaśāstra Literature, Vol. I, by P. V. Kane.

Date of Kavīndra. The exact date of the abolition of the pilgrim-tax by Shah Jehan being yet unknown, nothing can be said about the exact age of Kavīndra. The mention of Shah Jehan, Dara Shukoh, Viśvanātha Nyāyapañcānana in the anthology only leads us to conclude that Kavīndrācārya was a contemporary of these persons. Kavīndrācārya composed one work called *Kavīndra Kalpadruma* a Ms. of which exists in the India Office Library at London. It has been stated in the Catalogue[1] that the first leaf of the Ms. is of 'about A.D. 1650'. If this statement is correct we can assign the period between 1627 and 1650 A.D. to the literary activity of Kavīndrācārya.

HAR DUTT SHARMA
M. M. PATKAR

1. I. O. Cat. No. 3947.

॥ श्रीगणेशाय नमः ॥

कवीन्द्रचन्द्रोदयः ॥

पुण्डरीकाक्षचण्डांशू चण्डीं चण्डीश्वरं तथा ।
वेतण्ड[1]तुण्डमानम्य निबन्धोऽयं निबध्यते ॥ १ ॥
तमस्तमःसङ्घविघातकारी समस्तविद्वत्परितापहारी ।
कवीन्द्रचन्द्रोदयनामधारी प्रबन्ध एषोऽस्तु जगत्प्रचारी ॥ २ ॥
विद्यानुकृतफणीन्द्रो विजितयतीन्द्रो मतीन्द्रो यः ।
स्ववशीकृतपृथिवीन्द्रो जयति कवीन्द्रो यतिर्जगति ॥ ३ ॥
गोदातीरनिवासी पश्चाद्येनाश्रिता काशी ।
ऋग्वेदीयाभ्यस्ता साङ्गा शाखाश्वलायनी शस्ता ॥ ४ ॥
निःस्पृहता विषयेभ्यः परानिजजनतप्रभिमानेभ्यः ।
प्राप्ता शैशवसमये विश्वेशानुग्रहाद्धृदये ॥ ५ ॥
लघुवयसा गततमसा सत्त्वाधिक्यादभिद्रवद्रजसा ।
येन च विद्या तरसा तपसा सर्वा वशीकृतैव[2] रसा ॥ ६ ॥
बुद्ध्वा विबुधाधिकतां दत्ता यस्मै कवीन्द्रसत्पदवी ।
यवनकरग्रहणाब्धौ मग्ना येनोद्धृता पृथिवी ॥ ७ ॥
विजितमहीतलतस्मै दत्तं विद्यानिधानपदमस्मै ।
आचार्याह्वयसहितं यतिबुधवृन्दैर्महीतले महितम् ॥ ८ ॥

इति कवीन्द्रवर्णनम् ।

श्रीमत्काशिविकाशिभिः सुकविभिस्तद्वत्प्रयागासिभि-
र्नानादेशनिवासिभिश्च रचिता विद्यागणोल्लासिभिः ।
श्रीकृष्णेन सरस्वतीपदयुताऽऽचार्योपनामाश्रित-
श्रीविद्यानिधिसत्कवीन्द्रविषया पद्यावली लिख्यते ॥ ९ ॥

---

१. C. वैतंड°. २. C. °कृतेव.

तत्रादौ कवीन्द्राष्टकम् ।

(१) स षडङ्गचतुर्वेदव्याख्यानकुशलो यती ।
आनन्दारण्यपारीन्द्रश्रीकवीन्द्रसरस्वती ॥ १० ॥

(२) अष्टादशपुराणज्ञो न्यायविज्ञो विवादिजित् ।
मीमांसाधर्मशास्त्राणि शास्ति नास्तिकशास्तिकृत् ॥ ११ ॥

(३) साहित्योपेतसौहित्यो योगवासिष्ठ[1]योगवित् ।
विख्यातकीर्तिः पूर्णेन्द्रब्रह्मेन्द्राद्यभिनन्दि[2]तः ॥ १२ ॥

(४) चतुर्णामपि वर्णानामाश्रमाणामविश्रमम् ।
शर्मकृत्कर्मनिरतो नर्मतो धर्ममर्मवित् ॥ १३ ॥

(५) दयादानसविज्ञानशीलसन्तोषभूषितः ।
धर्मवैराग्यसौभाग्यपरानन्दातिनन्दितः ॥ १४ ॥

(६) अमुना चिन्तितविभुना करनिर्मोकात्कवीन्द्रसुप्रभुणा ।
काशीप्रयागसंस्थः सुस्थः सर्वो जनोऽकारि ॥ १५ ॥

(७) विचार्याचार्यसादृश्यं सर्वैरानन्दकानने ।
आचार्यपदवी दत्ता कवीन्द्राय महात्मने ॥ १६ ॥

(८) कवीन्द्रशर्मणा शर्म सर्वेषां जगतीजुषाम् ।
वेदितव्या महीन्द्रेण भव्यानामत्र संमतिः ॥ १७ ॥

इति कवीन्द्राष्टकम् ।

(१) अशेषवेदार्थविशेषवेदी निःशेषशेषोदितसंनिवेदी ।
सन्न्यायविन्न्यायसुधासुधीन्द्रः स्वामी कवीन्द्रः स्मृतजाह्नवीन्द्रः ॥ १८ ॥

(२) विद्वद्वृन्दविभूषणः शुचिमतिप्रोन्मूलितागोगणः
श्रौतस्मार्तविधार्ककारितपुरः पुण्याम्बुजोद्भाटनः ।
शश्वद्दाननिदाननाशितरमावाणीरणः शोभनः
प्रीतश्रीरमणः कवीन्द्रविजयी दारिद्र्यविद्रावणः ॥ १९ ॥

(३) कालेनोन्मूलितः प्राक्कलिमलबलतः भ्रान्ति[3]वातातिशुष्क—
स्तत्तद्द्वैजिह्वजिह्वाज्वलनकवलितः सर्वतः प्राज्वलिष्यत् ।

---

१. A. °वाशिष्ठ°. २. C. °नन्दवित्. ३. A. B. प्रांति°.

श्रेयःशाखी कवीन्द्रप्रभुवरजलदः सद्दयाम्भोभिषेकै-
रेनं नापालयिष्यद्यदि सुमतिकलाकॢप्तमूलालवालम् ॥ २० ॥

(४) दानाधानविरागयोगयजनस्वाध्यायविध्यादिभिः[1]
कुर्वन्तु प्रतपः परन्तु न जनैः[2] कोऽद्यापि कोऽपीदृशः ।
यो ग्राहाधिकयावनाधिपकरग्राहाधिपन्नाद्विप-
श्रीतीर्थाधिपतिप्रमुक्तिसुकृतोपेन्द्रैः कवीन्द्रैः समैः[3] ॥ २१ ॥

(५) किं नो सन्ति सहस्रशोऽपि यतयः प्रौढाभिमानाढ्यधयः
स्वीयस्वीयसुदुर्भरोदरदरीदुःपूरणैकोद्यमाः[4] ।
किन्तु श्रीन्द्रकवीन्द्रवीन्द्रमहिमस्वामीन्द्रमानीन्द्रस-
द्दिल्लीन्द्रप्रियषोडशीमपिकलामर्हन्ति नो दाम्भिकाः ॥ २२ ॥

(६) प्रपञ्चे निर्वेदी सुकृतविनिवेदी हरिपदे
छलांहोविच्छेदी[5] निखिलखलखेदी सुखखनिः ।
चतुर्वेदी वेदी भुवनभयभेदी करलयात्
स्फुरच्चित्संभेदी[6] त्रिजगति कवीन्द्रो विजयते ॥ २३ ॥

(७) प्रकाशीकृताऽतीव काशी समस्ता
प्रयागोऽपि चाऽगोपि दिल्लीन्द्रभीतेः ।
तमोनाशिभिः काशिभिः काशिसंस्थै-
र्यशोराशिसंभासिभिः श्रीकवीन्द्रैः ॥ २४ ॥

(८) जरीहार्त्तिं जाड्यं जनानामजस्रं
चरीकर्त्तिं कल्याणकूटं कलाभिः ।
सरीसर्त्तिं संसारसिन्धोः प्रपारं
यतीन्द्रः कवीन्द्रो वरीवर्त्तिं काश्याम् ॥ २५ ॥

(९) इन्द्रानन्दसरस्वत्याद्याभासाः सन्ति कोटिशः ।
एक एव यथार्थोऽयं श्रीकवीन्द्रसरस्वती ॥ २६ ॥

(१०) यथा स सर्वोपरिदेवरुद्रो नित्यं विनिद्रो निजभक्तकृत्ये ।
कवित्वपाण्डित्यदयासमुद्रो यतिः कवीन्द्रो विचकास्ति काश्याम् ॥२७॥

---

१. C. °विद्यादिभिः २. ABC. read नजनुः । Shall we explain न जनुः यस्य सः? ३. C. समं ४. C. °दुष्पूर° ५. C. खलांहो°. ६. A. °संवेदी.

अथ पत्रिकाश्लोकाः ।

स्वस्ति श्रीमद्विशिष्टश्रुतिविधिविविधाकृष्टपुष्टप्रतिष्ठा-
निष्ठाकाष्ठाकनिष्ठीकृतकृतगरिमश्रीवसिष्ठादिकेषु ।
विद्वद्द्रोष्टीगरिष्ठप्रथितनृपसभप्रोद्यदुद्दण्डचण्ड-
स्वीयप्रोक्तप्रयुक्तिप्रविहितसुमहद्वादिमालाजयेषु[1] ॥ २८ ॥
तत्तत्संसारसाराखिलगुणविहगैकालयद्क्ष्मारुहेषु
प्रौढाभिप्रीतपृथ्वीपतिनमितमुहुःशर्मकर्मीकृतेषु ।
प्रोद्यत्कीर्तिप्रपूर्त्या धवलितदशदिङ्मण्डलेषु प्रकाण्ड-
ब्रह्माण्डोद्भूतभूताधिकतरगरिमैकान्तकान्तायितेषु ॥ २९ ॥
म्लायद्विद्याम्बुजालीविघटनपटुसद्भास्करेषु प्रशुष्यद्-
विद्वच्छ्रोतोवहाढ्यंकरणकृतिमहावारिवाहायितेषु ।
मज्जत्तीर्थप्रतिष्ठाधरणिसमधिकोद्धारवाराहरूप—
श्रीविष्णूद्दामजिष्णूकृतनिजमनुजालङ्करिष्णूत्तमेषु ॥ ३० ॥
काशीन्द्रश्रीफणीन्द्रप्रमुखमुनिकृतातीन्द्रसद्व्याकृतीन्द्र—
ज्ञानीन्द्रद्योमणीन्द्रद्युतिमतिजितवाणीन्द्रवीन्द्रायितेषु ।
दानीन्द्रश्रीमहीन्द्रप्रतिमकविकलारण्यवारीन्द्रशालि—
स्वामीन्द्रश्रीकवीन्द्रप्रभुवरचरणाम्भोजयुग्मेषु तेषु ॥ ३१ ॥
साष्टाङ्गं समहामहं सविनयं सप्रेम सोत्कण्ठितं
श्रीकृष्णप्रहितं प्रणामशतकप्रापीदकं पत्रकम् ।
विज्ञाप्यं च भवद्यशःशशिकलानन्तोदयोद्द्योतना—
दानन्दाब्धिरिहापि मे प्रतिपलं वृद्धिं विधत्तेऽतुलाम् ॥ ३२ ॥
चन्द्रं चापि चकोरका मधुलिहो मध्वालयं वा मधुं
हंसालीव सुमानमानसमथो योगीव योगीश्वरम् ।
संशुष्यद्वलतालुचातक इवाम्भोदोदयं कामदं
यौष्माकीणं[2]मनुक्षणं प्रतिदिनं भव्योदयं भावये ॥ ३३ ॥
यद्वाणीवाणवाणी परिवृढदनुजाराध्यवाणीर्विजित्य
त्यैन्मूर्ध्न्यर्धाय पादं जगदुपरि नरीनर्ति कास्थेतरेषु ।

---

१. C. °जपेषु. २. ABC. यौष्माकीन. ३. A यन्मू°.

तान् को नाम स्वयोक्त्या सुखयतु सुषमाधामकामाभिरामान्
किंत्वेतान् भक्तिरेका मृडयति तदिदं क्षम्यतां मेऽपि धाष्ट्र्यम् ॥ ३४ ॥
किमाधिकमधिकज्ञेष्विज्यपूज्याधिकेषु प्रणतिनुतिविकाशिस्वीयवृत्तप्रकाशि ।
कृतजगदुपकाराः श्रीमहेशावतारा यदिह विदितचित्तारूढगूढप्रचाराः ॥ ३५ ॥

श्रीकृष्णोपाध्यायानामेतानि पञ्चत्रिंशत्पद्यानि ॥

१. कर्णादयो वितरणप्रथिताः पृथिव्यां यद्यप्यबोभवुरनल्पगुणाभिरामाः ।
साम्यं तथापि न कवीन्द्र ययुस्तवैते यावत्स्वतुल्यसमयैरहगृहीतवित्ताः ॥ ३६ ॥

२. क ईदृग्दाताभूज्जगति भविता वा भवति वा
प्रयागे विश्वेभ्यो मकरमधियाते दिनमणौ ।
विरक्तेभ्यो वित्ते वितरणपटुभ्योऽप्यतितरां
भवद्भिन्नो द्युम्नं चितरति ददौ दास्यति च यः ॥ ३७ ॥

३. तत्तच्छास्त्रप्रमेयप्रकथनपटुता काव्यनिर्माणदाक्ष्यं
वक्तृत्वं तच्च वाचस्पतिवचनजयि प्रेम विद्वत्स्वपूर्णम् ।
शीलं निःसीमरूपं नयनहृतिकरं चारुसीमन्तिनीनां
तन् किं चित्रं समेतैर्यदिह गुणगणैः कोटिमेतामयासीः ॥ ३८ ॥

४. विद्यानिधानकृतमान बहुप्रदान दिल्लीश्वराहत शमत्र भवत्कृपातः ।
भूयः सदा सदिह तद्भवदीयमीहे विश्वोपकारघटनं यदधीनमस्ति ॥ ३९ ॥

५. नाकर्णि कश्चिन्निरवर्णि नो वा कीर्तिप्रियस्त्वज्जगतीतले त्वन् ।
स्वातन्त्र्यलक्ष्मीं यतिमात्रगम्यां हित्वा परार्थं परवानभूर्यत् ॥ ४० ॥

एतानि **हेमराजमिश्राणां** पञ्च पद्यानि ॥

१. दैन्यध्वान्तमुदस्य पुष्कलकरैराशास्यमापूरयन्
प्रोल्लास्य द्विजचक्रकेलिमनिशं मैत्रीं गुरौ वर्धयन् ।
सत्पद्मोन्नतिहेतुना सरभसं भृङ्गालिमुल्लासयन्
श्रीमत्स्वामिकवीन्द्र भास्कर इव प्रोल्लासमुच्चैः कियाः ॥ ४१ ॥

२. वक्त्राम्भोजं सरस्वत्यधिवसति सदा ज्ञानतृष्णां बुधाना-
मामूलं वारयन्ती स्फुरदमृतरसस्यन्दिनी यस्य सोऽयम् ।
ब्रह्मानुध्यानकारी विगलितविषयो विश्वकल्याणकारी
भाति श्रीमान् कवीन्द्रश्चतुरुदधिलसत्कीर्तिचन्द्रो यतीन्द्रः ॥ ४२ ॥

३. दुष्टाशीविषहन्ता गन्ता गोविन्दगौरवारूढः ।
विनतानन्दविधायी मन्ये नूनं कवीन्द्रोऽसि ॥ ४३ ॥

४. लोकानां प्रतिवस्तु शारदशशिभ्रान्तिं समुल्लासयन्
श्रीगौर्योर्गुरुविभ्रमं स्मरहराकारं हरौ कल्पयन् ।
आरादात्मविदामशेषविषयब्रह्मैक्यमुद्दीपयन्
धीर श्रीलकवीन्द्र तावक यशोराशिः समुज्जृम्भते ॥ ४४ ॥

जयरामभट्टाचार्याणामेतानि चत्वारि पद्यानि ॥

१. ब्रूमः कथं तव कवीन्द्र गुणानशेषान्
शेषः सहस्रशनोऽपि न शक्त एव ।
वक्तुं तथापि कविकौतुकमादधानां
मानोन्नतिं तव नरेन्द्रकृतां वदामः ॥ ४५ ॥

माधवभट्टानामदः पद्यम्

१, गाम्भीर्यं जलधेर्नयं भृगुसुतात्प्रज्ञां गुरोर्धीरतां
पृथ्वीतः सुरभूरुहाद्वितरणं कान्तिं तुषारद्युतेः ।
किं चान्यज्जगदीश्वरादपि दयामाकृष्य विश्रान्तये
त्वय्याधाय कवीन्द्र भारमखिलं निद्राति सुस्थो विधिः ॥ ४६ ॥

२. वैरूप्यं नरभालभस्मनयनैर्धत्ते मृडानीपति—
स्तत्पातुं गरलं कलङ्ककपटादङ्के सुधांशुः स्वयम् ।
किं च प्रस्तरतां गतो हिमगिरिर्गङ्गा च नीचाश्रिता
कैः कैः किं न कृतं कवीन्द्रसुयशश्चन्द्रे समुन्मीलति ॥ ४७ ॥

विश्वनाथपञ्चाननभट्टाचार्यपुत्ररामदेवभट्टाचार्याणां[1] पद्यद्वयमिदम् ।

१. धर्मे धर्मसुतो द्युतौ दिनमणिर्विद्यासु वागीश्वरः
कीर्तौ पूर्णसुधानिधिः सुचरिते रामः सुरूपे स्मरः ।
ऐश्वर्ये गिरिशोऽवने सुररिपुः काव्ये स्वमेव स्वयं
दाने कल्पतरुः कवीन्द्र कविभिः केनोपमेयो भवान् ॥ ४८ ॥

२. योगीन्द्राः क्षोणिपालाः कति कति न बुधाः सन्त्यभूवंश्च लोके
किन्तु श्रीमत्कवीन्द्र त्वदतिगुणमणिक्षीरसिन्धोः पृषत्कम् ।

---

१. A. विश्वनाथपञ्चाननभट्टाचार्याणां पद्यद्वयम्.

नालं स्प्रष्टुं च वेणीमरणजनिशतैरप्यसंख्यप्रयासै-
स्तद्वाणी चित्तदूराऽतुलमहिमनिधे त्वत्समानस्त्वमेव ॥ ४९ ॥

३. वेदात्माङ्गतनुः सुयोगातिलका वेदान्तसत्कुण्डला
मीमांसावलयाऽऽगमैकरसना काणादहारोज्ज्वला ।
सांख्यप्रस्वननूपुरा परिणमत्साहित्यदिव्यांबरा
न्यायोद्यन्मुकुटा कवीन्द्र जयति त्वद्भारती नर्तकी ॥ ५० ॥

कूर्माचलस्थवीरेश्वरपण्डितानां पद्यत्रयमिदम् ।

१. स्वकुलकमलभानुर्वैरिपक्षे कृशानु-
र्विबुधकुमुदचन्द्रो लोकवन्द्यो यतीन्द्रः ।
बहुविधगुणयुक्तः शिष्टलोकानुरक्तो
हरिचरणसुभक्तः श्रीकवीन्द्रो विभाति ॥ ५१ ॥

खड्गमिश्राणामिदमेकं पद्यम् ॥

१. वाङ्माधुरीरसवशीकृतमेदिनीन्द्रः
सर्वंसहासुमनसां करुणाधुनीन्द्रः ।
मच्चेतसि स्फुरति चेत्सुकृती कवीन्द्रः
किं किं न दास्यति जगद्विदितो यतीन्द्रः ॥ ५२ ॥

रघुनन्दनद्विवेदानां[1]मिदमेकं पद्यम् ॥

१. ब्रह्माद्वैतविभावनाहितमना वेदान्तसांख्यादिविद्
गण्यः पुण्ययशःसुधाधवलितब्रह्माण्डभाण्डावलिः ।
सौजन्याम्बुनिधिर्महागुणनिधिः साक्षाद्विधिः सर्वतः
श्रीमत्पर्वतकन्यकाचरणयोः सोऽयं कवीन्द्रो रतः ॥ ५३ ॥

२. जाताः स्वोदरपूरका बहुविधास्ते ते प्रतिष्ठान्विता
नैतादृङ्मम कोऽपि बुद्धिविषये यादृक्कवीन्द्रः कृती ।
केनैतादृगुपार्जितं जलनिधेः पारेतटं गामुकं
स्वर्गङ्गाप्रविगाहि भोगिभवनाभूषाप्रभूतं यशः ॥ ५४ ॥

रघुनाथदीक्षितानामिदं पद्यद्वयम् ॥

---

१. A. °द्विवेदिनां°.

१. उमेन्द्रं रमेन्द्रं दिनेन्द्रं गणेन्द्रं
महेन्द्रं महीन्द्रं तथा न स्मरामः ।
यथा श्रीकवीन्द्रं मुनीन्द्रं गुणीन्द्रं
यतीन्द्रं मतीन्द्रं रतीन्द्रं भजामः ॥ ५५ ॥

कस्यापि

१. नरीनर्ति तर्कों यदीयः सभायां
सरीसर्ति वाणी यथा सिन्धुधारा ।
चरीकर्ति पद्यं जरीहर्ति मोहं
वरीवर्ति सोऽयं मुदा श्रीकवीन्द्रः ॥ ५६ ॥

२. वेदान्ता हृदयङ्गमाः किंमपरं[1] वेदाः स्वयं हस्तिता
मीमांसा वशवर्तिनी चुलुकितो न्यायाम्बुधिः श्रीमता ।
काणादं रसनाग्रवर्ति भणितिः शेषस्य कण्ठावृता
सांख्यं काव्यमनर्गलं कविपते पातञ्जलं नेत्रयोः ॥ ५७ ॥

३. करितुरगसमूहे काञ्चने रत्नराशौ
क्वचिदपि स कवीन्द्रो दीयमाने न तृष्णाम् ।
अभजदखिलतीर्थोद्धारतां संदधानो
न हि जलधरजालं वर्षतस्तोषमेति ॥ ५८ ॥

४. दिक्पालाः स्वसमीहितं हि भवतः प्रापुः कवीन्द्र प्रभो
विद्वांसोऽपि समागता बहुविधा ब्रह्माण्डभूगोलकान् ।
भूपालाः कति नागतास्तव गृहे किं वर्णयामो वयं
दिल्लीशो यवनाधिपो नरवरो भाग्योदयं वाञ्छति ॥ ५९ ॥

५. आस्ते मन्मतमेतदद्भुततरं वादादिभिर्वर्जितं
मोक्षे काञ्चनमेव कारणमहो नापेक्ष्यते तत्त्वधीः ।
श्रीमद्देव कवीन्द्रनामसुकवे त्वच्चारुचामीकरो-
त्सर्गेरेव जगाम मोक्षपदवीं दारिद्र्यमुर्वीतले ॥ ६० ॥

क्षमानन्द[2]वाजपेयिनामेतानि पञ्च पद्यानि ॥

---

१. A. किमपरे. २. C. क्षेमा°.

१. निर्धर्मं निर्गुणं ब्रह्मेत्यूचुर्वेदान्तिनो वरम् ।
सर्वे धर्मा गुणाश्चास्मिन् श्रीकवीन्द्रे वसन्ति यत् ॥ ६१ ॥

२. नो भूम्यादिचतुष्टयं तव यशो व्यापित्वतः खादि न
श्वेतत्वान्न गुणादि मेऽधिकमिदं द्रव्यं मतं साम्प्रतम् ।
इत्थं शोणतया कवीन्द्र भवतः प्रेयान् प्रतापोऽप्यतः
काणादोक्तिरयुक्तिरेव विबुधैर्हेया गुणग्राहिभिः ॥ ६२ ॥

भय्याभट्टानां द्वयमिदम्

१. पृथ्वीशार्ककरेण दुःसहतरेणावग्रहात्तं नृणां
दृष्टादृष्टफलप्रदं सुकृतिनां क्षेत्रं प्रयागादिकम् ।
सूक्त्यैवामृतधारया प्रशमयन् योऽमूमुचत्तद्व्यथां
कुर्वन् सुग्रहसत्फलं जयति तच्छ्रीमान् कवीन्द्रो बुधः ॥ ६३ ॥

२. अम्भोजं श्रीनिवासो व्यभिचरितमिदं व्याप्तिरेषा न तादृग्-
यद्दृष्टं श्रीकवीन्द्रेक्षणयुगकमलं यं यमेवावृणीते ।
सम्पत्तिस्तं तमेव श्रयति बहुगुणा तत्र सङ्केत ईदृक्
चन्द्रस्येवाब्जताया ध्रुवमिदमुदितं भावितं तत्त्वविज्ञैः ॥ ६४ ॥

३. विद्या श्रीः कीर्तितुष्टी धृतिरतिशयिता ह्रीश्च धर्मैकसीमा
श्रेयः सत्त्वप्रधानं दधति हि मतुपं यं समासाद्य चाद्य ।
तस्मिञ्श्रीमत्कवीन्द्रे गुणिगणगणनारम्भसंख्यायमाने
मिश्रश्रीकेशवम्यानतिरतिगणितासंमदव्यूहदाम्तु ॥ ६५ ॥

४. स्वामिश्रीमत्कवीन्द्रे चरणसरसिजानम्रविश्वम्भरेन्द्रे
योगीन्द्रे भूमिपेन्द्रेऽर्जुन इव कपिले ज्ञानशास्त्रे द्विजेन्द्रे ।
दिङ्नागेन्द्रे मृगेन्द्रे सुनयवितरणन्यूनदेवासुरेन्द्रे
शब्दाम्भोधौ फणीन्द्रे निवसतु कमला चातके मय्यपीन्द्रे ॥ ६६ ॥

केशवमिश्राणां चत्वारि पद्यानि ॥

---

१. C. धर्मगुणा°. २. BC. खादिनः. ३. BC. भैया. ४. BC. भावित-त्तत्त्वविज्ञैः. ५. AB. विद्याः. ६. C. मनुषं. ७. C. भूम्युपेन्द्रे.

१. द्राक्षातिरूक्षाक्षरदग्धरक्षा क्षुद्रा भव क्षौद्रगिरोस्तु मुद्राः ।
वचः कवीन्द्रस्य बुधैर्निपेयं सुधैवकापीयमिति प्रतीमः ॥ ६७ ॥[3]

२. स्वार्थातिक्रमवर्तिनो न विविधाः केऽप्यर्थवादा यतो
नो बाध्या जनिशिष्टसद्गुणगणैरुत्पन्नाशिष्टा गुणाः ।
ऊहो यत्र वसन् स्फुरत्यविरतं सार्वत्रिकोऽकृत्रिमो
मीमांसात्वमपूर्वमंचति यतेर्मूर्तिः कवीन्द्रस्य किम् ॥ ६८ ॥

मीमांसकसिद्धेश्वरभट्टानामिदं पद्यद्वयम्[4] ॥

१. कविकर्मधारयोऽयं न चित्रमिन्द्रो बृहस्पतिर्नापि ।
प्राप्तसकलात्मभावब्रह्मीभूतो यतो मतो जगति ॥ ६९ ॥

चक्रपाणिपण्डितानामिदमेकं पद्यम् ॥

१. अत्यादराद्ध्ययनं द्विजानामर्थोपलब्ध्या फलवद्विधाय ।
क्रतूननुष्ठापयितुं कवीन्द्रमीमांसकाद्याधिकृतिः प्रसिद्धा ॥ ७० ॥

२. पावमानं हविर्ग्राह्यं करेणेत्यवदन्मुनिः ।
श्रीमुनीन्द्रकवीन्द्रेण वारितोऽपि स वारितः ॥ ७१ ॥

३. यस्य वाक्यं विधिः सर्वं[5] सर्वे मन्त्रा विधायकाः ।
सर्वाभिधा प्रसिद्धार्था तं कवीन्द्रमुपास्महे ॥ ७२ ॥

गणेशभट्टधर्माधिकारिणां पद्यत्रयम् ॥

१. येषां दया ब्राह्मणभूम्नि षाष्ठद्विरुक्तिवत्स्यात्समुदायगैव ।
विनिश्चितानावयवप्रधाना जयन्तु ते भुव्यनिशं कवीन्द्राः ॥ ७३ ॥

२. सदाश्रितं यूयमवेत मां द्राग्वृद्धिर्भवेन्मे नितरां कवीन्द्राः ।
शब्देऽस्त्ववृद्धिः फणिनाभ्युपेतो यतः पुरस्तादपवादभावः ॥ ७४ ॥

३. ब्राह्मणे द्रुतमसोढनिषेधा नुम्यधातुपदवत्कृतकार्याः ।
सस्मितास्यकमलाः प्रियवाचः सर्वदा भुवि जयन्ति कवीन्द्राः ॥७५॥

४. राज्ञः कराद् ब्रह्मकुलस्य बाधां सद्यः प्रयागादिषु ये निरास्थन् ।
वृद्धेष्वणश्छादिव भिन्नयोगोऽपत्यस्य ते यान्तु जयं कवीन्द्राः ॥७६॥

सामराजपण्डितसुतनागेशपण्डितानां श्लोकचतुष्टयम् ॥

---

१. C. °गिरौस्तु । Read क्षुद्राभवक्षौद्रगिरोऽस्तु मुद्रा । २. Read वापी ।
३. Not given in A. ४. A. पद्यं । ५. C. सर्वं. ६. C. सोमराज°.

१. श्रीकवीन्द्र महाराज द्विजराजसमृद्धये ।
करोषि यानि कर्माणि तानि ते सन्तु सिद्धये ॥ ७७ ॥

परमेश्वराचार्याणामेकः श्लोकः

१. रूपे दस्रसमः कवित्वकरणे वागीशलब्धोपमः
सत्कीर्त्या हरिणा समः प्रभुतया शक्रोपमः सम्पदा ।
यक्षाधीशसमश्च यः स करुणासिन्धुः कवीन्द्रः कृती
भूमीमण्डलमण्डनाय भवताद्दीर्घायुषा संयुतः ॥ ७८ ॥

२. सुपत्राढ्यो[1] द्विजिह्वारिर्विनतानन्दवर्धनः ।
कवीन्द्र वीन्द्रवद्भासि भगवच्चरणाश्रयः ॥ ७९ ॥

३. गलद्दानोदककरः करिणीमण्डितः सितः ।
ऐरावण इवाभासि कवीन्द्र विबुधप्रियः ॥ ८० ॥

रामकृष्णनागरस्य पद्यत्रयम् ।

१. कवीन्द्रभूषणं भूमौ कवीन्द्रेन्दुं समाश्रये ।
यस्योदयाज्जगत्सर्वं निर्मलं तीर्थमण्डलम् ॥ ८१ ॥

२. धर्मद्रुमः कलिनिदाघसमुत्थदाहैः शोशुष्यते नियतमेव समस्त एव ।
नोचेद्भवेद् भुवि कवीन्द्रसुमालिकस्य चारित्र्यवारिलहरीप्रसरावसेकः ॥ ८२ ॥

मैथिलोपाध्यायविश्वम्भरकृतमिदं श्लोकद्वयम् ॥

१. श्रूयन्ते सखि यस्य निर्मलगुणाः सौन्दर्यमार्यं महा-
गाम्भीर्यं मधुरं वचः कथय मे कोऽसौ कवीन्द्रः कृती ।
म्लेच्छाम्भोनिधिमग्नहैन्दववृषोद्धाराय नारायणः
साक्षादेष समस्तलोककृपया पूर्णोऽवतीर्णो भुवि ॥ ८३ ॥

२. मीमांसाश्रुतिमौलिसांख्यरचनाकाणादपातञ्जल-
न्यायव्याकरणस्मृतिप्रवचनप्रत्यक्षवाचस्पतिः ।
सर्वस्वेन परोपकारकरणप्रौढव्रते दीक्षितः
सोऽयं सर्वकलाकलापकुशलो जीयात्कवीन्द्रः कृती ॥ ८४ ॥

---

१. C. °त्राद्यो.

३. प्रालेयाचलमेव वा स्वपितरं पाथोनिधिं वा पतिं
भीता किं कुरुतां भगीरथसुता काशीं विहाय व्रजेत् ।
विश्वेशोऽपि महाश्मशाननिलयः किं वा विधत्तामसौ
त्वं धन्योऽसि कवीन्द्र यावनकरग्रस्ताविमौ मोचितौ ॥ ८५ ॥

जगदीशजार्नाकस्य श्लोकत्रयम् ॥

१. स्वर्गे कल्पमहीरुहो विजयते पातालमूले बलि-
र्मन्ये कोऽपि न विद्यते मतिमतां त्राता च दाता जनः ।
इत्यालोच्य विरिञ्चिना सुमतिना दातावदाताशयो
यत्नादेष विनिर्मितो नरपतिः श्रीमत्कवीन्द्रो यतिः ॥ ८६ ॥

२. का त्वं प्रेयसि ? दुग्धनीरधितनूजाताग्रजाता, कुतः ?
क्षोणीतः, कथमप्रसन्नवदनं ? स्थानं न मे कारणम् ।
दैन्यं क्वापि न विद्यते, कथमहो ? दानेन तन्नाशितं,
केन ? श्रीमतिमत्कवीन्द्रयतिना, तद्वैरिगेहं व्रज ॥ ८७ ॥

श्रीरामेश्वरपञ्चाननभट्टाचार्याणां श्लोकद्वयम् ॥

१. प्रामाण्यं परतः स्वतोऽपि भवतो विज्ञायते सन्मते
भूमीचन्द्र कवीन्द्र सुस्थिरतया वर्णाः स्थिरं स्थापिताः ।
सर्वज्ञैकसदीश्वरोऽपि न परं ब्रूते भवानीश्वरं
तन्नैयायिकनायकस्य भवतो मीमांसकत्वं कुतः ॥ ८८ ॥

२. प्रामाण्यं वचनेषु ते यतिपते जातिः परैवोन्नता
शक्तौ साधकमानमद्भुतमभूदेकोपमानं तव ।
जातौ सन्ति गुणा गुणेषु भवतो जातो विशेषोदय-
स्तद्भूमीन्द्र कवीन्द्र चित्रमभवद्वैशेषिकत्वं तव ॥ ८९ ॥

जयकृष्णोपाध्यायानां श्लोकद्वयम् ॥

१. यत्पाण्डित्यपराभवादिव दिवं यातो गिरामीश्वरो
भूमीतो भुजगाधिपः किमपरं पातालली नोऽभवत् ।
यत्पादाम्बुजरेणवोऽपि सुषमां कुर्वन्ति भूमीभुजां[1]
सोऽयं लोचनगोचरो यतिवरो जातः कवीन्द्रोऽधुना ॥ ९० ॥

---

१. C. °रुहां.

२. सौन्दर्येण विनिर्जितो रतिपतिर्दानेन कर्णो नृपः
पाण्डित्येन दिवौकसां गुरुरहो धर्मेण धर्मात्मजः ।
इत्थं स्वामिकवीन्द्रभव्य भवता केनैव खर्वीकृताः
किं वा जेतुमतः परं विजयते यत्नस्तु सर्वाधिकः ॥ ९१ ॥

गौरीपतिमिश्राणां पद्यद्वयम् ॥

१. कवीन्द्र पृथ्वीन्द्रकरग्रहात्त्वया विमोचिता भाष्यसुभाषितादिभिः ।
श्रीकाशिका साधुपदप्रकाशिका शब्दापशब्दोत्तमबोधकारिका ॥९२॥

नीलकण्ठाचार्याणामेकं पद्यम् ॥

१. तत्कृतं यन्न केनापि तद्दत्तं यन्न केनचित् ।
तत्साधितमसाध्यं यत्कवीन्द्रयतिना भुवि ॥ ९३ ॥

दामोदरभट्टकालोपनामकानाम् ॥

१. तेजोनिधिस्त्वमसि किं च गुरुर्धरायां
सौम्यः कविः शुचिकलानिधिरप्यसि त्वम् ।
एकोऽप्यनेकविधतां कथमागतोऽसि
श्रीमत्कवीन्द्र परमाद्भुतमेतदस्ति ॥ ९४ ॥

२. गायति गोपीनाथं ध्यायति बुद्ध्यैव धूर्जटिं धीरः ।
हरिहरभक्तिजितेन्द्रो[1] जयति कवीन्द्रः कृती[2] काश्याम् ॥ ९५ ॥

३. बलिरथ च दधीचिः कर्ण आसीच्च पूर्वं
तदुपम उपकर्ता सांप्रतं कोऽपि नास्ति ।
इति मनसि विभाव्योत्पन्नविश्वानुकम्पः
कलियुग इह धाता श्रीकवीन्द्रं ससर्ज ॥ ९६ ॥

४. नो देवेषु न वासुरेषु च न वा यक्षेषु रक्षःस्वहो
नो वा योगिषु नापि सिद्धमुनिषु श्रुत्यागमज्ञेषु वा ।
नो वा राजसु पण्डितेषु च न वा संन्यासिषु प्रक्रिया
या केनापि नवाऽनवा न रचिता सा श्रीकवीन्द्रैः कृता ॥ ९७ ॥

अग्निहोत्रिधर्मेश्वरस्य पद्यचतुष्टयम् ॥

---

१. B. °भक्त°. २. A. यतिः.

१. विद्ववृन्दकरीन्द्रगण्डदलने पारीन्द्रवारीन्द्र भोः[1]
श्रीयोगीन्द्र कवीन्द्रचन्द्र विदुषां त्वन्नामपुण्यावलीम् ।
श्रुत्वा सर्तुमपीहते चलहृदाऽघौघेन यानोन्मुखं
वैमुख्यं द्रुतमातनोति नितरां दारिद्र्यदावानलः ॥ ९८ ॥

२. पाण्डित्यं जगतीतले तनुभृतां तावद्धि संवर्धतां
यावद्विश्वविवस्वतोऽधिकरुचिर्जागर्ति योगीश्वरः ।
दारिद्र्यं सदनेऽवसीदतु भृशं तावन्नृणां नित्यशो
यावन्नैव कवीन्द्रसुन्दरदृशो रीतिः समुज्जृम्भते ॥ ९९ ॥

मैथिलदामोदरोपाध्यायानाम् ॥

१. वैयाकरणकुम्भीन्द्रकुम्भनिर्भेदभीषणः ।
कवीन्द्रकेसरी भाति काश्यामानन्दकानने ॥ १०० ॥

चक्रपाणिपण्डितानाम्[3] ॥

१. अर्थं चाभीष्टहेतुं प्रकलयसि पुनर्मानियोगं[4] फलेच्छौ
नापि त्वं स्तुत्यपेक्षः सकलगुणनिधे प्रस्फुरद्रूपभावः ।
सर्वैः कामैः प्रपन्नः प्रकटयसि नृणां कृत्यसाध्यं पुमर्थं
वैधं रूपं तवेत्थं प्रजयति परमं चित्रकृच्छ्रीकवीन्द्र ॥ १०१ ॥

विश्वनाथज्योतिर्विदामिदमेकम्[5] ॥

१. विधाय वेषवैषम्यं निमज्जन्ती कराम्बुधौ ।
क्षोणीव विष्णुना वेणी कवीन्द्रेण समुद्धृता ॥ १०२ ॥

व्रजभूषणकवेः ॥

१. चक्रेण मोचयांचक्रे नक्राच्छक्रानुजो गजम् ।
प्रयागेभं करग्राहात् करग्राहात्कवीन्द्रवित् ॥ १०३ ॥

श्रीस्वामिनामेव[5] ॥

१. अवद्यजम्बालगवेषणाय कृतोद्यमानां खलसैरिभाणाम् ।
कवीन्द्रवाङ्निर्जरनिर्झरिण्यां संजायते व्यर्थमनोरथत्वम् ॥ १०४ ॥

कृष्णचन्द्रभट्टानाम् ॥

---

१. B.C °कवीन्द्र° । २. A. °वादीन्द्र. ३. BC. कस्यचिदिदमेकम् ।
४. C. नियोगे । ५. Read °मेकम् ?

१. गुणा द्रव्याण्याश्रयन्ते गौतमोक्तागमे ध्रुवम् ।
कवीन्द्र महदाश्चर्यं गुणास्तव तदाश्रयाः ॥ १०५ ॥
२. कवयः शतशः सन्ति कवीन्द्र त्वत्समा न ते ।
कलयन्ति किमुद्योतान् खद्योतास्तरणेस्तुलाम् ॥ १०६ ॥

कस्यचिदिदं द्वयम् ॥

१. यशःपूरकर्पूरसम्पूरिताशो गुणागारसंसारसारैकसारः ॥
अलङ्कृत्य लोकं समुद्धृत्यशोकं पुनानो धुरीणश्चिरं स्यात्कवीन्द्रः ॥ १०७ ॥
२. शेषाशेषस्य काकोलाद्भ्रमन्ती भारती शनैः ।
श्रीकवीन्द्रमुखं प्राप्ता सुखं वर्षति माधुरीः ॥ १०८ ॥

कस्यचिदिदं द्वयम् ॥

१. उमेन्द्रं च केचिद्रमेन्द्रं च केचिद्दिनेन्द्रं च केचिद्गणेन्द्रं नमन्ति ।
तदिन्द्रान्तमेतत्परित्यज्य सर्वं वयं त्वां यतीन्द्रं कवीन्द्रं नमामः ॥ १०९ ॥

बालकृष्णत्रिपाठिनः ॥

१. स्वस्ति श्रीमदमन्दसुन्दरगिरिग्रावाग्रनृत्यद्यशः-
श्रेणीनिर्जितनिर्जरालयसरित्सौभाग्यसम्पत्तिषु ।
धीमद्ब्रह्मविचारचित्रितमनःसञ्जातबोधोदय-
प्रत्यक्षीकृतदिव्यवस्तुषु नतिः श्रीमत्कवीन्द्रेषु नः ॥ ११० ॥
२. श्रीकृष्णं व्रजसुन्दरीव विवशा सीतेव रामं पतिं
संसारार्तिहरं भवानिव परं ब्रह्म प्रमोदालयम् ।
सुच्छायां सरसीमिवार्ककिरणक्लिष्टस्तृषार्त्तः करी
नित्यं द्रष्टुमहं समुद्यतमनाः श्रीमत्कवीन्द्राभिधम् ॥ १११ ॥

अनिरुद्धमिश्राणां पद्यद्वयम् ॥

१. निखिलभुवनधाम प्रीणितश्रीसुदाम
प्रतिकलितसुदाम स्वर्पतिस्तव्यनाम ।

---

१. Emendation. Mss. read °वद्योता । २. This verse wanting in A.

अवतु यतिकवीन्द्रं व्याप्तदिक्कीर्तिचन्द्रं
व्रजभुविकृतधाम व्यक्तमव्यक्तधाम ॥ ११२ ॥

बालकृष्णज्योतिर्विदाम्

१. यत्पार्श्वे[1] श्रुतिशास्त्रनिश्चयरता गेहे स्थिताः पालका
द्वारे या करिणी विनोदकरिणी गङ्गातरङ्गाकुला ।
अन्ये भैरवदण्डपाणिसदृशाः काश्यां समन्तात् स्थिता-
स्तस्य श्रीविलसत्कवीन्द्रनृपतेः संदर्शनं दुर्लभम् ॥ ११३ ॥

२. करस्य मोचनं यस्माद् वीतरागो विवासनः ।
द्रवति द्रविणं नित्यं कवीन्द्रस्तेन कथ्यते ॥ ११४ ॥

३. दिल्लीश्वराय निगमागमशास्त्रबुद्ध्या
सम्बोधयन् प्रतिदिनं त्रिजगत्कवीन्द्रः ।
श्रीतीर्थराजकरमोचनलब्धकीर्ति-
र्विद्यानिधानमहिमा न हि मानगम्यः ॥ ११५ ॥

४. यः[2] साक्षाद्व्रजराजलब्धमहिमा प्राप्तः प्रतिष्ठां पुन-
र्दैवत्वं निजशारदातनुलसल्लेभे कवीन्द्रः प्रभुः ।
श्रीविश्वेश्वरकाशिकासुरनदीतीरे सुवर्णं ददौ
श्रीमत्साहिजहांदिलीपकृपया विद्यानिधानाभिधः ॥ ११६ ॥

५. पुरी मस्तके भारती कण्ठदेशे मुखे शारदा चास्य केशा वनानि ।
भुजौ पर्वतौ सागरो नाभिनालं मनस्त्वाश्रमाः पादतीर्थं पिबन्ति ॥ ११७ ॥

६. कामाक्षाप्रथमप्रयाणसमये विद्यानिधानप्रभो-
रिन्द्रत्वं तव मस्तके कृतवती श्रीसाहिजाहा[3]मुखात् ।
सा सद्यो भवतां प्रयच्छतु मुदा साम्राज्यलक्ष्मीं सदा
श्रीमत्सर्वमनोरथाः फलभृतस्ते सन्तु पूर्णाशिषः ॥ ११८ ॥

पूर्णानन्दब्रह्मचारिणां षट्[4] पद्यानि ॥

१. कवीन्द्रस्वामिनां नाम विख्यातं भुवनत्रये ।
नात्र चित्रमिरंभ्यां(?) च सिद्धं तत्पदवाचकम् ॥ ११९ ॥

---

१. This verse wanting in A. २. This verse wanting in A.
३. Shall we read श्रीः? ४. A. चत्वारि.

२. कणादो जैमिनिर्व्यासः कपिलो गौतमस्तथा ।
पतञ्जलिः स्वयं साक्षात्कवीन्द्रस्वामिदेवताः ॥ १२० ॥

३. अष्टादशसु विद्यासु निष्णातो जगतां गुरुः ।
कवीन्द्रस्वामिराजेन्द्रो राजते रामचन्द्रवत् ॥ १२१ ॥

४. कवीन्द्रस्वामिनां नाम ग्रहणाद् दुःखराशयः ।
पलायन्ते हरेः सङ्गात्तमसामिव राशयः ॥ १२२ ॥

५. भट्टो नारायणः साक्षात्पुरासीच्छङ्करः शिवः ।
तथैवात्र स्वयं कृष्णः कवीन्द्रस्वामिदण्डधृक् ॥ १२३ ॥

६. कमनीये भवेद्रामः कामो वा नलनैषधः ।
गाम्भीर्ये सरितां नाथः कवीन्द्रस्वामिवाक्पतिः ॥ १२४ ॥

७. हनूमान् भयनाशाय करतापनिवारणे ।
सुधांशू रामभद्रोऽपि कवीन्द्रस्वामिशङ्करः ॥ १२५ ॥

८. सर्वोपकृतये विद्याऽधीता गीता सुनिश्चिता ।
गोब्राह्मणभयत्राणे कवीन्द्रस्वामिभास्करैः ॥ १२६ ॥

९. आचार्याचार्यहंसानां शंव-तारजुषां[1] (?) सताम् ।
कवीन्द्रस्वामिनां भक्त्या मुरलीशकृताष्टकम् ॥ १२७ ॥

कालिदासमिश्रपौत्रस्य **मुरलीधर**स्यैतानि नव ॥

१. भ्रान्तेः पुरुषधर्मत्वाद् दोषाः पुरुषवर्तिनः ।
तद्गुणग्राहिणा भाव्यं गुणिगुण्यगुण त्वया ॥ १२८ ॥

२. कोविदव्रातकुमुदस्फुरत्कुमुदबन्धवे ।
नमः कवीन्द्रवर्याय सदा सद्बहुतन्त्रिणे[2] ॥ १२९ ॥

३. पाण्डित्यदण्डितोद्दण्ड[3]षण्डाखण्डलमन्त्रिणे ।
नमः कवीन्द्रवर्याय सदा सद्बहुतन्त्रिणे ॥ १३० ॥

४. सद्दारिद्र्याटवीभूमविलसद्धूमकेतवे ।
नमः कवीन्द्रवर्याय भजनानन्दहेतवे ॥ १३१ ॥

---

१. C. शंबतारजुषां. २. A. गुणमाणिक्यसिन्धवे. B. स्वदास°. ३. Emendation; A reads °दण्ड°. This verse wanting in B and C. ४. C. °भूमौ. ५. C. जगद्गु°.

५. नमन्महीशमुकुटहीरहारिनखेन्दवे ।
नमः कवीन्द्रवर्याय सदानन्दितबिन्दवे ॥ १३२ ॥

६. वाडवार्त्यब्धिवडवह्व्यवाडवतारिणे ।
नमः कवीन्द्रवर्याय स्वेच्छासौख्यविहारिणे[1] ॥ १३३ ॥

७. श्रीखण्डपुण्डरीकेन्दुपिण्डपाण्डुरकीर्तये ।
नमः कवीन्द्रवर्याय दयासागरमूर्तये ॥ १३४ ॥

८. गुणच्छटापटाच्छन्नसमस्तविलसद्दिशे ।
नमः कवीन्द्रवर्याय सरोजविकसद्दृशे ॥ १३५ ॥

९. दधीचिबलिकर्णादिवर्णवर्णापहारिणे ।
नमः कवीन्द्रवर्याय दानज्ञानाधिकारिणे ॥ १३६ ॥

१०. यः पठेत्स्पष्टमुत्कृष्टं कवीन्द्राष्टकमिष्टदम् ।
तुष्टः पिनष्टि तत्कष्टं स ह्यष्टापदयष्टिभिः ॥ १३७ ॥

कृष्णाचार्यस्यैतानि दश ॥[2]

१. केचिद्वेदविदग्रणीषु निरताः केचिच्च यज्ञक्रिया-
पारीणेषु परे पुराणकथकेष्वन्येऽथ सङ्गीतिषु ।
आयुर्वेदपरेषु केऽपि गणकेष्वन्ये ह हा हा कथं
कालेऽस्मिन् कवितावतारिषु न वा कोऽप्यस्ति लेशादरी ॥१३८

२. चिन्ताप्रतानपरिचुम्बितचित्तवृत्ति-
स्त्यक्तुं कविः स्वकवितां वनितामिवैषीत् ।
यावत्कृपापरवशा गिरिराजकन्या
तावत्सहासमवदत् श्रितनीपवन्या ॥ १३९ ॥

३. परोपकृतिसाहसी भुवनसीम्नि हंसीकृत-
प्रशस्तिरनिशं वशी दलितदुर्गताशीविषः ।
शशीव शुभलक्षणात्सदयमीक्षणावेक्षणा-
त्करिष्यति कवे[3] क्षणात्तव कवीन्द्रनामा क्षणात् ॥ १४० ॥

४. आस्ते कोऽप्यवनीतले परिचितः पाथोद एवोचितः
स्वोत्कर्षात्कविलोकचातकमिलच्छोकावलोपे कृती ।

---

१. This verse wanting in A. B. स्येछा°, C. स्वच्छा°. २. A.C. नव.
३. C. कदेक्षणा°.

सर्वस्वीकृतशास्त्रसागरमहोदारप्रचारव्रती
सत्कीर्तिप्रतिभूरभूतविनयः श्रीमान्कवीन्द्रो यतिः ॥ १४१ ॥

५. धैर्याकूपारसीमा प्रतिभटसुषमास्तोमसोमार्यमायं[1]
श्रीमान्कामारिवामास्तुतपदमहिमा पुण्यनामार्यधामा ।
श्रीमान् धर्मात्मना यः स्फुटतरमुपमामाप भूमाविहेष्ट-
प्रेमा जीयात्कवीन्द्राभिधयतितिलकः कोऽपि वंशावतंसः ॥१४२॥

६. यदालोके लोके कविकुलकलानां सफलता
परं स्वैरं पद्मा समजनि तदागारवशगा ।
यदीया सत्कीर्तिर्विहरति सदाशाऽतुलमुखे
मखेशप्रीतं तं यतिवरकवीन्द्रं श्रय सखे[2] ॥ १४३ ॥

७. यशः पारावारस्तिरयति सुधाम्भोनिधिमहो
महश्चान्द्रं सान्द्रं जगति जयिनो यस्य सुमतेः ।
गुणग्रामः स्फीतः कलयति विवृद्धिं कविमुखे
मखेशप्रीतं तं यतिपतिकवीन्द्रं श्रय सखे[3] ॥ १४४ ॥

८. केचित्काञ्चनवाञ्छयात्र बहुधा त्वां भूतलाखण्डलं
सेवन्ते विबुधा मुधाकृतसुधावाचां प्रपञ्चैश्चिरम् ।
विद्वद्भूषण दैन्यदूषणकलासिन्धो कवीन्द्र प्रभो
यातस्ते समया जयाधिककविः सोऽहं कपर्देच्छया ॥ १४५ ॥

९. दानेनालिपतकल्पपादपतते पद्मालयानायका-
सक्त प्राक्तनभूरिवैभवजितारातेकृतेज्यानते ।
विद्वन्मण्डन दैन्यखण्डन मनाग् वर्षाशनान्नाश्रितं
कर्तुं मामुचितं कवीन्द्र भवतः काश्यां स्वनामोर्जितम् ॥ १४६ ॥

१०. श्रुतिसागरवारपारदृश्वा स्मृतिविश्वासवणिक् धृतेभसम्पत् ।
परिषत्प्रियकृत् श्रिया कवीन्द्रः प्रतिपच्चन्द्र इव प्रयातु वृद्धिम् ॥१४७॥

११. पहुवीअलएक्कचक्कवत्ती णिअकित्तीधवलीकिदांजमुत्ती ।
समिदाखिलसाहुलोअअत्ती तुह वण्णत्ति स कोवि पक्खवत्ती ॥१४८॥

---

१. C. °यः २. C. पति° । ३. C. सखि. ४. This verse wanting in C. ५. C. °दाय°

१२. हत्थो दे पहुवीअले सुरवई साही तधा संमदा
दिट्ठी कामदुघा सुधापियवचो रंभामुहाकित्तियो ।
संकप्पो किल कोत्थुभोत्ति हिअअं चंदो वि धण्णंतरी
फंसो होसि कवीन्द साहु सरसो रण्णा अरोणं तुमं ॥ १४९ ॥

१३. अङ्गंगो जस्स गोरी परिलसइ तहा जस्स चंदस्य लेहा
सीसे भालप्पदेसे तिलअदि णअणं जस्स हत्थे कवालं ।
साद्दूलं जस्स चम्मं पियणिअवेसणं भूसणं जस्स सप्पो
जस्स ट्ठाणं मसाणं वरिसदु हरिसं तुज्झ देओ वसंको ॥ १५० ॥

१४. सच्चं कासि तुमं मिअंकवअणे ? गंधव्वराजस्य मं
णो जाणासि वहुं, कुदो सहअरं उज्झीअ एआइणी ।
सिघ्घं जासि ? कइंदणामपहुणो सक्किकित्तिवारंगणा-
रूवे लुद्धमणोरहो मम वई देसंतरे हिंडइ ॥ १५१ ॥

१५. जोह्नाचंदणअङ्गराअसुहअं चंदं ललाटंतरे
हारं तारकसंघमोत्तिघडिदं घेत्तूण वासं णहो ।
कित्ती दे पहुवीअले पसुवई ठाणं गिरीसं करे
कादुं कंदुअगोलअं णिअवलं प्पब्भारदो खेलदि ॥ १५२ ॥

१६. वर्णी न मी तूज जसा सुवर्णी तैसां करी पूर्ण मला सुवर्णी ।
कर्णोपकर्णी प्रसरो सुवर्णी त्वकीर्तिमुक्ताफल जेवि कर्णी ॥ १५३ ॥

१७. अधिगतनृपमानः प्राप्तविद्याभिमान-
स्त्रिदशगुरुसमानः साधितोच्चैः समानः ।
कृतविविधविधानः प्रत्तविद्वद्विधानः
स जयति गुणधानः श्रीकवीन्द्राभिधानः ॥ १५४ ॥

१८. कासारः किमु सर्वतः परिवृतो यो राजहंसैरयं
किं वा पद्मवनं नृलोचनचलद्रोलम्बरोलम्बरम् ।
किं वा जीवनमस्ति सज्जनमनोमीनावनं पावनं
श्रीपृथ्वीन्द्रसमुद्रसान्द्रसुखकृच्चन्द्रः कवीन्द्रः किल ॥ १५५ ॥

पट्टवर्धनमहादेवभट्टानामष्टादश पद्यानि ॥

---

१. C. वहुली° २. A. रस्मा C. रणा. ३. A. B. छेहा. ४. A. सदूलं B सद्दूलं. ५. A. °निअ° ६. C. ओजूअ ७. A. वर्णा. ८. B. कर्णा°.

१. स्वस्ति श्रीनृपसाहजाहविलसच्छ्रीराजधानीस्थिति-
र्विद्योतद्युतिराजराजिमुकुटालङ्कारहीराङ्कुरः ।
विख्यातो जगति प्रतापिचरितः श्रीमान्कवीन्द्रो यतिः
संजागर्ति पतिः सतामविरतं विश्वोपकारव्रते ॥ १५६ ॥

२. सुरेन्द्रोऽपि निद्रादरिद्रो यतस्तं श्रितो यं नरेन्द्रं[1] कवीन्द्रो यतीन्द्रः ।
तमन्ये ह मेन्ये[2] परार्थादिहार्थं समर्थं पुमर्थं तमेवाहुरार्याः ॥ १५७ ॥[3]

३. तस्यैते चरणारविन्दयुगलं ध्यायन्ति सर्वे द्विजा
युष्मत्स्वीकृतपद्मनाभचरणच्छायामुपाध्यासिताः ।
किं चान्येऽप्यधिकारिणोऽपि भवतामाज्ञामुपास्यान्वहं
वर्तन्तेऽवनिनाथ पत्रमितरच्चागामि कृत्वान्ततः ॥ १५८ ॥

४. कान्तो मुँख्यप्रकारस्तदनु चकास्त्यत्र सर्वार्थदायी
शान्ँताकारः सवर्णेष्वापे न विकुरुते नाप्यजन्यैः सवर्णः ।
काशीतोऽपि प्रकाशा जयति गुणवदाद्यौष्ठ्यमूर्धन्यवर्णा
मोच्या दुष्टावरोधादियमपि नगरी सार्वभौमाञ्चितेन ॥ १५९ ॥

५. श्रीमद्धन्यकवीन्द्रसंयुतसरस्वत्या गुणाम्भोनिधे-
र्नीत्वा साधुगुणामृतं परकृति श्रीपद्मनाभाश्रमैः ।
यत्प्रत्यर्पितमीषदाशु सुजनादित्येषु तेन क्षणा-
ल्लीनं दुष्टसुराद्विषाद्विरिह किं चित्रं विचित्रात्मनाम् ॥ १६० ॥

६. कर्मन्दिनामिव कलौ कुजनार्दितानां-
मद्वैतभावमनसां प्रतिपालनाय ।
दत्तो नु शङ्कर इतो विदधेऽवतारं
नाम्ना कवीन्द्र इति विश्वजनोपकारी ॥ १६१ ॥

७. यं पद्मनाभोऽपि धियाधिशेते[6]
सरस्वती न क्षणमप्युदास्ते ।
पुष्णासि भो मामपि वाङ्मयं चे-
त्कवीन्द्र सिन्धुर्भवितासि किं न ॥ १६२ ॥


८. उच्चैर्दशावानपि यावदर्थं
स्नेहेन भर्तुः स्वशरावकस्य ।

---

१. B. यन्नरेन्द्रं २. B. मत्वं ३. Wanting in A. ४. A. मुख्यः
५. C. शीता° ६. BC. °शिशेते.

न साधयेच्चेत्प्रतिपाद्यमानं
कवीन्द्रदीपो वद कोऽन्य ईदृक् ॥ १६३ ॥

९.




१०.

ली	नायदङ्घ्रिभजनादपि पङ्कमा	ला
म्यो हर्म्यतम	अत्र चतुर्षु कोणेषु स्थितैरक्षरैः कवि- नाम स्पष्टं भवति ॥	पद्मालीमधुपैर्यु
४	[illegible]	५

॥ १६५ ॥

१. C. द्योतटीव्योमकू. २. C. °मेतदनघं.

११.



॥१६६॥

१२. प्रकाशापुरीवासिलीलाधरेण ध्रुवं भट्टविश्वेश्वरस्यात्मजेन ॥
दलं पद्मनाभाश्रमस्याश्रयेदं व्यजिज्ञापि चञ्चत्कवीन्द्राम्बुजेषु ॥ १६७ ॥
दाक्षिणात्यलीलाधरभट्टस्यैतानि द्वादश पद्यानि ॥

१. याति द्राक्स्थिरतां कवीन्द्र भगवन् त्रैलोक्यमाक्रामति
स्वैरं सर्पति सर्वतः प्रतिदिशं प्रोत्तुङ्गतामञ्चति ।
भूमीन्दो हृदयङ्गमं प्रणयिनां युष्मद्यशोमण्डलं
पृथ्वीवत्परिवेषवत्पवनवत्प्रासादवत्प्राणवत् ॥ १६८ ॥
मैथिलबदरीनाथोपाध्यायानाम् ॥

१. येन श्रीसाहिजाहाँ नरपतितिलकः स्वस्य वश्यः कृतोऽभूत्
किं चावश्यं प्रपन्नः पुनरपि विहितः शाहिदाराशकोहः ।
काशीतीर्थप्रयागप्रतिजनितकरग्राहमोक्षैकहेतुः
सोऽयं श्रीमान् कवीन्द्रो जयति कविगुरुस्तीर्थराजाधिराजः॥ १६९॥

२. [1]काश्मीरैराक्कारस्करदरदखुरासानहब्शानजाता
वङ्गारब्वाः फिरङ्गास्तुरुकशकवदक्शानमुल्तानवल्काः ।
खान्धाराः काबिलेन्द्रा अपि धरणिभृतस्ते मगा रूमशामाः
श्रीमच्छ्रीसाहिजाहानरपतिसदसि त्वां कवीन्द्र स्तुवान्ति ॥१७०॥

३. त्वद्वक्त्रोत्थकवित्वशीतकिरणत्रासाकुलान्तः पुटं
खिद्यद्वाग्भ्रमरीविलासमलसं दोषान्धकारावृतम् ।
मद्वक्त्राम्बुरुहं विकाँसयतु सद्वाणीलसत्सौरभं
श्रीवादीन्द्रकवीन्द्र तावकगुणप्रद्योतनोषःप्रभा ॥ १७१ ॥

हीरारामकवेस्त्रीणि ॥

१. दाने राज्ये गवि क्षान्तौ श्रीकवीन्द्रोऽस्तु सर्वदा ।
कर्ण-राम–गुरू-वीभिः समः सूर्येण तेजसा ॥ १७२ ॥

२. त्वं बुद्ध्या गुरुरंशुभिः शशधरः सूर्यश्च तेजोभरै-
रग्निस्त्वं च वरप्रतापनिवहैर्वायुर्बलेनासि किम् ।
श्रीदस्त्वं कमलासमर्पणतया विद्यानिधान प्रभो
गाम्भीर्येण च नीरधिश्च मदनो रूपेण विद्वद्विभो ॥ १७३ ॥

गणेशभट्टानां द्वयम् ॥

१. चतुर्वेदीविदां श्रेष्ठः षडङ्गाध्यायिनामपि ।
शास्ति शास्त्राणि सर्वाणि साहित्यसहितानि च ॥ १७४ ॥

२. अष्टादश पुराणानि तथा सर्वा अपि स्मृतीः ।
योगवाशिष्ठविज्ज्येष्ठः श्रीकवीन्द्रसरस्वती ॥ १७५ ॥

३. ब्राह्मणानां क्षत्रियाणां वैश्यानां शूद्रजन्मनाम्
ब्रह्मचारिगृहस्थानां वानप्रस्थाभिधाजुषाम् ॥ १७६ ॥

४. दण्डिनामवधूतानां सर्वकाशीनिवासिनाम् ।
पण्डितापण्डितानां च परमानन्ददायकः ॥ १७७ ॥

५. ब्रह्मेन्द्रपूर्णेन्द्रयतीन्द्रवृन्दमुख्यैरशेषैराभिनन्द्यमानः ।
यतिः कवीन्द्रोऽस्ति विभासमानः सद्धर्मपुञ्जेन विराजमानः ॥१७८॥

---

१. BC. कश्मी°. २. B. गुराशान, A. खुराशान. ३. Emendation. । ABC. °स्तबक°. ४. AB. °सामाः ५. AB. विकाशयतु.

६. दयाशीलसन्तोषवैराग्यधर्मक्षमादानविज्ञानसिन्धूपमानः[1] ।
परानन्दसन्दोहकन्दं ददानो महीमण्डलेऽसौ कवीन्द्राभिधानः॥ १७९॥

७. अमुना कवीन्द्रनाम्ना श्रीब्रह्मेन्द्रस्वाम्यनुगृहीतेन ।
काशीप्रयागकरयोर्मोको लोकोत्तरोऽकारि ॥ १८० ॥

८. यस्य वासेन सर्वस्य वासो भवति निर्भयम् ।
वेदितव्या महीन्द्रेण सर्वेषामत्र संमतिः ॥ १८१ ॥

सकलवारागसीनिवासिविशिष्टशिष्टकृतं कवीन्द्राष्टकमिदम् ॥

एष प्रवाहः करुणारसस्य १, सन्तरणसेतुः संसारसिन्धोः २, आधारः क्षमाम्भसाम् ३, परशुस्तृष्णालताग्रहनस्य ४, सागरः सन्तोषामृतस्य ५, उपदेष्टा सिद्धिमार्गस्य ६, अस्तगिरिरसद्गृहस्य[2] ७, मूलमुपशमतरोः ८, नाभिः प्रज्ञाचक्रस्य ९, स्थितिवंशो धर्मध्वजस्य १०, निलयः कलानाम् ११, तीर्थं सर्वविद्यावतराणाम् १२, कुलभवनमाचाराणाम् १३, आयतनं मङ्गलानाम् १४, दर्शकः सत्पथानाम् १५, उत्पत्तिः साधुतायाः १६, नेमिरुत्साहचक्रस्य १७, आश्रयः सत्यस्य १८, प्रतिपक्षः कलिकालस्य १९, कोशस्तपसः २०, सखा सत्यस्य २१, क्षेत्रमार्जवस्य २२, प्रभवः पुण्यसञ्चयस्य २३, अदत्तावकाशो मत्सरस्य २४, दिवसकरो मोहान्धकारस्य २५, अरातिर्विपत्तेः २६, अस्थानं परिभूतेः २७, अननुकूलोऽभिमानस्य २८, असंमतो दैन्यस्य २९, अनायत्तो रोषस्य ३०, अविषयो विषयाणाम् ३१, अनभिमुखः सुखानाम् ३२, निकषोपलः शास्त्ररत्नानाम् ३३, श्रीकवीन्द्रो महेन्द्र इव चिरं जीवतु ३४.

मौनिविश्वेश्वरभट्टानामेताश्चतुस्त्रिंशच्चूर्णिकाः[3] ॥

येनामोचि महीन्द्रदुस्सहकरग्राहाद्धि पुण्यश्रियो
वेणीव प्रचुरप्रमोदनकरी वेणी कलिद्रोहिणा ।
तीर्णः शास्त्रसरित्पतिर्धिषणया नीता परं[4] गौरवं
श्रीमद्धीरकवीन्द्रसाधुपदवी धन्यो हि तादृग्जनः ॥ १८२ ॥

श्रीमहीपत्युपाध्यायानाम् ॥

स्वस्ति श्रीमत्प्रचण्डपाखण्डशङ्कासुरापहृतपापपाथोधिमज्जत्त्रयीधर्मसमुद्धारमस्त्यावतारेषु १ सुविरूढतर्कभावनावशंवदाक्षपाददर्शनविख्यातनिर्वचन-

---

१. A B यमानः २. Wanting in A ३. A. °स्त्रय° । Numbers २६-३० wanting in B. ४. C. पदं. ५. C. °कृत.°

पाटवेषु २ विशदवैशेषिकावेशप्रकाशिताशेषक्षणसंख्याकलनविषमकार्योत्पत्ति-
विवेकेषु ३ भगत्पूज्यपादभाष्याकूतसम्भूतबादरायणीयन्यायनिदर्शनविवृतबृह-
दारण्यककठवल्लीपैप्पलादकौषीतकिच्छांदोग्याद्युपनिषद्रहस्येषु ४ दृढतराभ्यास-
स्फुरज्जैमिनीयविविक्ताशेषमन्त्रब्राह्मणेषु ५ निगमनिरुक्तव्याकरणशिक्षादि-
तत्त्वावगाहनसफलस्वाध्यायेषु[1] ६ वैदिकवासनापरिपूतहृदयोद्भूततर्कभावित-
समस्तमानवीयादिधर्मशास्त्रेषु ७ पुराणपरिच्छेद[2]प्रसृमरप्रतिभेषु परितः प्रसृत्वर-
सारस्वतप्रतिभानुबन्धबंधुराध्यापनसुभ[3]गभावुकाध्ययनेषु ९ गर्गादिमुनिवर-
यज्ञशास्त्रशालिदैवज्ञमनोज्ञव्यवहारसांवत्सरजातकसिद्धान्तपाटीबीजव्याख्यान-
कौशलेषु १० वात्स्यायनादिशास्त्रसन्देहच्छेदिषु १ गङ्गाजलप्राञ्जलपातञ्जल-
परिशीलनानलसेषु १२ सांख्यसन्तोषितसंख्यावत्सु १३ परमाप्तेषु श्रीसर्वविद्या-
निधानकवीन्द्राचार्यसरस्वतीषु ॥ १४ ॥

शिवदत्तमिश्राणामेताश्चतुर्दश प्रशस्त्यानुपूर्व्यः ॥

॥स्वस्ति श्रीमदनवरतपरोपकारनिरतदिगन्तविश्रान्तकीर्त्तिकर्पूरपूरसुरभी-
कृतत्रिलोकेषु[4] १ सकलकरमोचकेत्यादिविरुदावलीराजमानेषु २ श्रीसर्वविद्या-
निधानकवीन्द्राचार्यसरस्वतीषु ॥

चक्रपाणिपण्डितानाम् ॥

१. या कालिदासादिमहाकवीनां वाणी विलासाज्जरती बभूव ।
सैवेयमानन्दभरेण वाणी कवीन्द्रवक्त्रे नवतामुपैति ॥ १८३ ॥

कविशेखरस्य ॥

१. या विद्या प्रौढविद्याविशदगुणयुता सर्वदा सर्वदात्री
विख्याता या त्रिलोक्यामभिमतमतयः सर्वदा यां स्तुवन्ति ।
सा विद्या प्रौढरूपा विलसति हृदये यस्य नित्यं समन्ता-
त्सोऽयं श्रीमत्कवीन्द्रो जगति विजयते भूसुरेन्द्रैकवन्द्यः ॥१८४॥

२. यद्दानानेकरूपाः सपदि विलिखितक्ष्मातलन्यस्तचित्ताः
प्राप्तानेकाधिमार्गाः सुविहिताविहिताचारसन्त्यक्तमार्गाः ।
अस्तीभूताः समस्ताः प्रबलबलभुजो भूभुजो यन्निरस्ताः
सोऽयं जाग्रत्प्रभावो जगति विजयते श्रीकवीन्द्रो यतीन्द्रः ॥१८५॥

---

१. A. °सकल°. २. C. °च्छेदप्रशस्तामरप्र°. ३. A. °सुभगं°. ४. C. °क्ती°.

३. सदाचारचारी सदा श्रीकवीन्द्रो
विचारी सतां सद्गतानां गुणानाम् ।
समुद्योततां भास्वदुग्रप्रभाव–
स्वभावोऽखिलानां जनानां विभूत्यै ॥ १८६ ॥

४. सुरेन्द्रैः स्तुतो भूसुरेन्द्रैः प्रगीतः
सदा देवपूजारतिव्याप्तियुक्तः ।
भृशं सच्चिदानन्दरूपः कवीन्द्रो
यतीन्द्रो विभातीति लोके महेन्द्रः ॥ १८७ ॥[1]

भूधरपाठकानां चत्वारि ॥

१. आसक्तिमाधुर्यविभङ्गिभावैराकाङ्क्षया योग्यतया प्रसन्ना ।
कवीन्द्रवाणीतरुणीहगेषा केषां न चेतस्तरलीकरोति ॥ १८८ ॥

रघुनाथोपाध्यायानाम् ॥

त्वं विद्याम्बुधिलंघनैकनिरतः सा सप्तवारां निधीन्
धन्या तीर्णवती तनोषि विदुषां त्वं मानसं निर्मलम् ।
सा संसारमखण्डितं वितनुते चन्द्रोज्ज्वलं सर्वदा
तज्जानीहि कवीन्द्रधीर भवतः कीर्त्या भवान्निर्जितः ॥ १८९ ॥

२. नूनं शास्त्रसमुद्रोऽयं भवता निर्मलीकृतः ।
कवीन्द्र त्वद्यशःसोमोऽपङ्को यस्मात्ततोऽभवत् ॥ १९० ॥

पुनरपि **महीपत्युपाध्यायानां** पद्यद्वयम् ॥

१. नीचीकृत्य मुकुन्दभक्तिनिचयैः षड्वैष्णवाहंकृतिं[2]
श्रीमद्धन्यकवीन्द्र दानविधिना निर्जित्य भूमीभुजः ।
पादैकेन धरावलंबनविधौ खिन्नस्य मन्यामहे
धर्मस्येह करावलंबलगुडीभूतो भवान् वर्तते ॥ १९१ ॥

कविशेखरस्य ॥

१. कलौ युगे किलायाते धर्मोध्वंसं[3]ध्रुवं दधौ[4] ।
कवीन्द्ररूपो भगवानाविर्भूतः स्वयं विभुः ॥ १९२ ॥

---

१. Verses १८४-८७ are wanting in A, but found in C. २. C. °तीं.
३. C. °सं. ४. C. दधे.

इन्द्राधिकान् द्विजांश्चक्रे श्रीकवीन्द्रः कलौ किल ।
काश्यादिसर्वतीर्थेषु साक्षान्मोक्षं न्यचीक्षिपत् ॥ १९३ ॥

लक्ष्मणमहापात्रस्यैतौ ॥

१. त्वं बुद्ध्या धिषणोंऽशुभिः शशधरो भानुः प्रभानां भरै—
र्वह्निस्त्वं च नवप्रतापनिवहैर्वायुर्बलेनासि किम् ।
ईश[1]श्रीन्द्रकवीन्द्रधन्यधनदो विद्यानिधान प्रभो
गांभीर्येण किमम्भसां निधिरहो रूपेण किं दर्पकः ॥ १९४ ॥

कस्यापि ॥

॥ स्वस्ति श्रीमन्निखिलविद्वन्मान[2]समानसराजहंसेषु १ सत्कविबुधोत्तंसेषु २ सच्चिदंशेषु ३ स्मृतिनिहतदुष्टकंसे[3]षु ४ वृषस्फुरदंशेषु ५ कविताकादम्बरीपानसमयविहितचारुशास्त्रविचारपललोपदंशेषु ६ निरस्तसमस्तदुर्हृदयदंशेषु ७ समुल्लसत्सद्वंशेषु ८ विगमितजगदुदरगतापभ्रंशेषु ९ विहितपातकजातविस्रंसेषु १० सुकृतिसुकृतप्रशंसेषु ११ सौन्दर्यविनिर्जितपञ्चसायकेषु १२ ॥ सकलशर्मनिर्मायकेषु १३ दीनावलिदीनारवृन्ददायकेषु १४ प्रसादितविनायकेषु १५ कलाकलापसमुल्लासितजगन्नायकेषु १६ पृथ्वीपावनपावकेषु १७ साधुसिद्धिसमाधायकेषु १८ समुच्चयचातुर्यचारित्र्यसंचायकेषु १९ गिरीशगोविंदगुणगणगायकेषु २० सकलशास्त्रसिद्धान्तनिकायनिष्ठषकेषु(?) २१ सुकृतसुकृतनिकरनिःकल्मषीकृतकायकेषु २२ असत्समभिव्याहारविहायकेषु २३ विचित्रचरित्रेषु २४ सर्वंसहासहित्रेषु २५ खलद्रुममूलसमूलोन्मूलनखनित्रेषु २६ त्रिपथगापयःपूरपवित्रेषु २७ सद्यः समुद्यदनवद्यविद्यासुधाधारासवित्रेषु २८ धरण्यधन्यमूर्द्धन्यदुर्द्धीधोरणीपावित्रेषु २९ सन्मित्रेषु ३० महाध्यंबुधिपुण्यक्रियासमुत्तरणतरीविधृतसमुल्लसत्कौशलसदरित्रेषु ३१ विद्यावदनरित्रेषु ३२ प्रभानुकृतप्रचण्डमित्रेषु ३३ कपटलंपटलोकलौल्यलवित्रेषु ३४ श्रीसर्वविद्यानिधानकवीन्द्राचार्यसरस्वतीषु ॥

श्रीस्वामिशिष्याणाम् ॥

---

१. C. °श्रीश. २. C. drops °मानस°. ३. C. स्मृतनिहतकंसेषु. ४. A °पायकेषु. ५. Nos. 18–21 Wanting in C. ६. Shall we read °निश्चायकेषु? ७. सद्यः Wanting in A. ८. C. °रिपावित्रेषु. ९. Nos.32–33 Wanting in C.

॥ श्रीमत्परमहंसपरिव्राजकत्वाद्यनेककल्याणगुणनिधानेषु राजमण्डली-गीयमान[2]चरणसरोरुहद्वंद्वेषु १ अतिविशदयशःशशधरकरनिकरविकासप्रकाशित-समस्तदिगन्तप्रदेशेषु २ पदवाक्यप्रमाणज्ञा[3]चार्यधौरेयसर्वतंत्रस्वतंत्रमुकुटमाणि-क्यायितेषु ३ अनवरतवेदान्तोपनिषद्रसास्वादितात्मवैभवेषु ४ श्रीपादवर्य-श्रीकवीन्द्राचार्यसरस्वतीपूज्यचरणेषु ५॥

तिलभाण्डेश्वरस्य ॥

॥ स्वस्ति श्रीमत्समस्तगुणरत्नाकरेषु १ सर्वतीर्थशिरोमणिश्रीवाराणसी-तीर्थराजप्रभृतितीर्थनिचयकरमोचनसमुद्भूतपुण्यराशिपरंपराविर्भूतविशदयशः-स्तोमविशदीकृतभूमंडलेषु २ सकलावनीतलवास्तव्याशेषसंख्यावत्संस्तूयमान-सकलविद्याकलापविजितविमतवा[4]दिनिवहेषु ३ सार्वभौम[5]प्रभृतिसकलमही-पालसंतो[6]षावहसकलकलाविराजमानेषु ४ महोदारमहाशयपरमात[7]श्रीसर्वविद्या-निधानकवीन्द्राचार्यसरस्वतीप्रभुवरेषु ५ ॥

ब्रह्मेन्द्रसरस्वतीनाम् ॥

॥ स्वस्ति श्रीमच्चतुरुदधिवलयिताखिलमहीतलनिवसद्बुधवरनिरतिशय-प्रीतिकरगद्यपद्यरचनापराजितकालिदासादिकविवरेषु १ व्यासगौतमपराशर-जैमिनिपतञ्जलिप्रभृतिसकलप्रबन्धकर्तृसमष्ट्यवतारेषु २ अश्रान्ताशेषार्थविश्राणन-परितृप्तार्थिसार्थविस्मारितपारिजातादिदातृनिवहेषु ३ सार्वभौमप्रभृतिसकल-महीपालसंततसन्तोषावहसकलकलाविराजमानेषु ४ महोदारमहाशयपरमाप्त-श्रीसर्वविद्यानिधान[7]कवीन्द्राचार्यसरस्वतीपरिव्राजकपरिवृढेषु ॥ ५ ॥

ब्रह्मेन्द्रस्वामिनाम् ॥

१. कालोऽयं मृगयुः करालदशनः श्वादम्भ एव च्छलै-
रत्यन्तद्रढिमान्विता विरचिता तेनैव यद्वागुरा ।
तद्धीरेन्द्रकवीन्द्र धर्महरिणः स्यादक्षतो न क्वचि-
न्नोचेद्रक्षणमातनोषि गहनीभूत्वा गुणैः शाश्वतम् ॥ १९५ ॥

नारायणचतुर्वेदस्य ॥

---

१. C °गुणगणाग्रपुण्यराजमानमान्यराजमण्डली° २. C. adds °पूज्यमान° before °चरण° ३. C. °ज्ञाना° ४. °वादि° Wanting in C. ५. C. °प्रकृति°. ६. A. °संतोषासकल—वि°. ७. A om. °सर्वविद्यानिधान°.

१. अम्भोऽधितनयाम्भोजवासदम्भोपशान्तये ।
कवीन्द्रवदनाम्भोजे वसति स्म सरस्वती ॥ १९६ ॥

२. न्यायज्ञोऽपि न संशयं छलमपि प्रायो न वेत्सि क्वचित्
मीमांसाविहितादरोऽपि न परं जानासि मन्युक्रमम् ।
वेदान्तैकविचारकोऽपि मनुषे नो निर्गुणं सर्वतो
दण्डं मोचयसीह दण्डभृदपि श्रीमत्कवीन्द्र प्रभो ॥ १९७ ॥

तैलङ्गवैकुण्ठभट्टानामेतौ ॥

१. कल्पान्तःकरणप्रकाशकरणज्ञप्त्याचितश्रीपते-
र्ज्ञानाकारनिरूपणप्रकरणाकर्ण्यस्य पूर्णाकृतेः ।
स्वाज्ञानाभयदानुभूतिविबुधारब्धप्रसादोन्मुख-
क्रीडादेववरस्य दर्शनमिदं भूत्यै कवीन्द्रस्य ते ॥ १९८ ॥

२. सदलंकारविख्यातं सदागतिजनोदितम् ।
रससेतुपदानन्दं कवीन्द्रं राघवं भजे ॥ १९९ ॥

भानभट्टानामेतौ

क्वचिद्बुद्धिगर्वः क्वचिच्छुद्धिगर्वः क्वचिच्छ्रीविगर्वः क्वचिद्बन्धुगर्वः ।
मम्मेत्थं मनोवृत्तयो गर्वगर्ते भ्रमित्वा महान्तं कवीन्द्रं भजन्ते[2] ॥२००॥

कस्यापि

१. दीनद्विजातिदारुणदुःखावलिदारुदारणे दृप्ता ।
वाणी सरसकृपाणी विलसति वाणी कवीन्द्रस्य ॥ २०१ ॥

व्रजभूषणकवेः ॥

१. आन्वीक्षिक्यच्छरत्नावलिविलित(विहित?)परीक्षाक्षमस्त्वं क्षमायां
मीमांसारण्यपञ्चाननफणिभणिताम्भोधिकुम्भोद्भवश्रीः ।
सांख्यप्रख्यातपातञ्जलकुमुदवनीचन्द्र वैशेषिकज्ञ
स्वाध्यायाध्यापकाद्य द्युमणिरिव समुद्द्योतसे श्रीकवीन्द्र ॥२०२॥

२. भट्टो भट्टनये गुरुर्गुरुनये श्रीशङ्करः शाङ्करे
काणादे च कणाद एव मनुतामाप्तो मते मानवे ।
साहित्ये भरतः पतञ्जलिमुनिः पातञ्जले गौतम-
स्तर्के व्याकरणे च पाणिनिरसौ श्रीमत्कवीन्द्रः कृती ॥ २०३ ॥

---

१. B. °णं°. २. C. भजेहम् । Verses 198–200 wanting in B.

३. काणादे कणभुक् पतञ्जलिमुनिः पातञ्जले प्राञ्जले
सांख्ये संख्यविशेषभाजि कपिलो व्याख्यातृमुख्याधिपः ।
श्रीव्यासोऽप्यथ चैष जैमिनिमुनिर्वेदान्तमीमांसयो-
स्तर्के गौतम एव केवलमसौ श्रीमत्कवीन्द्रो यतिः ॥ २०४ ॥

केषांचित् पद्यत्रयम् ॥

१. नित्यानन्दतिदाभदर्शनदयादेवस्य भद्रकृते[1]
क्षुद्राहंकृतिमुद्रणप्रमितये प्रज्ञानमुद्रादरन् ।
रूपं यस्य निरूपमानकवनोपाख्यानमुख्याकृते-
रेकाद्य प्रतिपाद्यसाधनमनानन्दैः कवीन्द्रप्रभो (?) ॥ २०५ ॥

भानभट्टानाम् ।

१. श्रीकवीन्द्रयशो भाति सर्वोपरि निरन्तरम् ।
दानशक्त्या हरेर्भक्त्या धर्मशक्त्या च केवलम् ॥ २०६ ॥

गङ्गारामभिश्राणाम् ॥

॥ स्वस्ति श्रीमत्संजातस्वसंवेद्यापरोक्षनिरतिशयानन्दसाक्षात्कारान् १ अगणितगुणग्रामाभिरामान् २ वचनरचनाचमत्कारावि[ष्]कारनिराकृतप्रखरमुखरवादिवृन्दान् ३ अनवद्यगद्यपद्याद्यनेकविद्याविनोदितसकलसहृदयहृदयान् ४ पाखण्डपलालखण्डाच्छादितवेदशेवधिप्रकाशनप्रज्वलितशास्त्रज्वलनज्वालान् ५ यज्ञपुरुषोपासनपरायणानपि नयज्ञपुरुषोपासनपरायणान् ६ जगत्सु समदर्शनसेवनप्रसितानर्थं समदर्शनसेवनप्रसितान् ७ हितोपदेशकुशलानपि विहितोपदेशकुशलान् ८ सज्जनासज्जनानुग्रहनिग्रहसंगृहीतधर्मसङ्ग्रहान् ९ दिगङ्गनावतंसीकृतयशःकुसुमोपचयान् १० करीन्द्रमोक्षवन्महाकरविमोचनपरिगृहीतश्रीभगवत्स्वरूपान् ११ श्रीसार्वभौमसंमानितान् १२ श्रीसर्वविद्यानिधानकवीन्द्राचार्यसरस्वतीश्रीपादान् १३ वाराणसीवासिनः संन्यासिपण्डितमहाजनप्रभृतयः समस्तजना यथोचितकलिताञ्जलिपुटा अष्टाङ्गस्पृष्टभूमयश्चाशीराशीन्प्रणामांश्च निवेदयन्तो विज्ञापयन्ति ॥ १४ ॥

१. स्वयमिह सुदृशां सभासु केचिन्निजपुरुषार्थविधिं नु वर्णयन्तु ।
करटिकपाटपाटनेन प्रकटितपाटव एक एव सिंहः ॥ २०७ ॥

---

१. Emend. भद्राकृतेः । २. B. पाखण्डादिपलाल; ३. C. प्रमितान् for प्रसितान्; C. omits प्रसितानथसमदर्शनसेवन (haplography);

१. तीक्ष्णतुण्डाः श्लक्ष्णदण्डा रागिणः पक्षपातिनः ।
त्वां विनाऽन्ये तु यतयो विशिखा एव केवलम् ॥ २०८ ॥

काशीस्थसंन्यासिपण्डितानां पत्रमदः ॥

॥ स्वस्ति श्रीपुरुषोत्तमप्रभाप्रभावोज्वलबलवदाखण्डलकुलमण्डनपाण्डव-दोर्दण्डखाण्डवदाहताण्डवगाण्डीवातिचण्डकोदण्डाकुण्डकुण्डमण्डितभुजदण्डमण्ड-लार्धीशमौलिमण्डनरुचिरत्नचयकिरणानुल्लंघितप्रभाप्रवाहमणिनिवहोज्वलचरण-पीठमहीमहेन्द्रोदितमहेन्द्रगुरुगौरवेषु १ न्यायादिनिखिलशास्त्रावगमानुपहत-तत्त्वावगमविदिताखिलवेदान्तोदन्तप्रशान्तचित्तेषु २ नवरसकलितकोमलपदन्या-सोत्तमानुबन्धविशकलितकालिदासकवित्वललिततत्वेषु ३ दिननाथेष्विवोदया-भिभूतदोषाकरेषु ४ न कैरवमानितेषु ५ द्विजराजेष्विव स्वकरासङ्गविनिमीलित-पङ्कजकुलेषु ६ तीर्थराजेष्विव दृष्टादृष्टाभिलाषपरिपूरकेषु ७ ब्रह्मस्वरूपेष्विव ध्यानोपनीतनिखिलानन्देषु ८ श्रीसर्वविद्यानिधानकवीन्द्राचार्यसरस्वतीजगदु-ज्ज्वलचरितेषु ९ ॥

जगन्नाथपञ्चाननभट्टाचार्याणां पत्रमदः

१. टीकाकारोऽपि नारोहति तव तुलनां खण्डनो मण्डनो वा
गङ्गेशो बुद्धिलेशोपहतमतिरणुर्वर्द्धमानोर्द्धमानः ।
देवाचार्यो विचार्यो भवति भुवि पुनः शेषनागोऽपि तादृक्
धीरश्रीमत्कवीन्द्र त्रिभुवनवलये कः समस्ते समस्ते ॥ २०९ ॥

२. यवनकरग्रहदुःखात् पुररिपुवनिता विमोचिता काशी ।
सुकृतेन तेन मन्ये कवीन्द्र भवतः समः कोऽस्ति ॥ २१० ॥

मैथिलकायस्थस्य ॥

१. सुधा भवति सा मुधा मधुकथा वृथा जायते
मदालसमरालिनीरवमदोऽपि मन्दोद्यमः ।

---

१. A and C. omit °संन्यासि; २. B °ण्डकाण्डकुण्डलन°. ३. B °भुजदण्डली° ४. AC add the following before नवरसः— " पुरुहूतपुरोहितोत्तमविपक्षलक्ष क्षणविक्षोभशिष्यसन्तानमहोपाध्यायाध्यापन (C पित) कौशल ५. C °विकलित° ६. AC °ललिततत्त्वकवत्वेषु for °ललित°.

रसालफलजो रसो विफलतां तदालम्बते
कवीन्द्र भवतो यदा वचनमेतदाकर्ण्यते ॥ २११ ॥

गुर्जरस्य कस्यचित् ॥

१. वृथा मधुकथाप्रथा प्रवितथा तथा गोस्तनी
तरुण्यधरमाधुरी भवति साधुरीतिर्न हि ।
सुधापि वसुधातले भवति सा मुधा [1]मो बुधाः
कवीन्द्रकविता यदा कविवरैः समाकर्ण्यते ॥ २१२ ॥

स्वामिन एव ॥

१. वेदान्ते व्यासरूपं विमलरसमये भार्गवं काव्यकल्पे
[2]जल्पेऽनल्पेऽक्षपादं परमतदलनायालमीशानसूनुम् ।
आशीर्वादे वासिष्ठं यतिवरममितध्वान्तनिध्वंसभानुं
दिल्लीशानन्दसानुं पशुपतिपुरपं श्रीकवीन्द्रं नमामि ॥ २१३ ॥

२. गृहे गृहे वै गुरवोऽत्र सन्ति पदे पदे गोत्रभिदो भवन्ति ।
कवीन्द्र साम्यं दिव एतदेव भूमण्डले कल्पतरुस्त्वमेव ॥ २१४ ॥

३. यद्रोमकूपेषु हि सावकाशं सहस्रशोऽण्डानि परिभ्रमन्ति ।
त्वच्चित्तदेशं स समाश्रितोऽस्ति कवीन्द्र कस्ते समतामुपैति ॥२१५॥

४. दिक्कालयोर्व्योम्नि तथात्मपुञ्जे यद्वैभवं वाचनिकं तदस्ति ।
प्रत्यक्षगम्यं तु भवत्प्रभुत्वं कवीन्द्र ! दिल्लीपतिपूज्यपाद ! ॥२१६॥

५. यत्तत्वमस्याद्युपदेशवाक्यं ब्रह्माहमस्मि व्यवसायवाक्च ।
लक्ष्यं तयोरस्ति यदात्मतत्त्वं तत्त्वं कवीन्द्रेति वयं प्रतीमः ॥२१७॥

६. अज्ञानतश्चावरणं त्वभानं ततश्च विक्षेप उदेति पुंसाम् ।
स्वरूपभासादपबोधनाशे यश्चापवादः स भवान् कवीन्द्र ॥ २१८ ॥

७. कवीन्द्र विज्ञप्तिरियं मदीया विश्वोपकाराय हि वाक्त्वदीया ।
विश्वोपकारैकनिधे यतीन्द्र क्वचित्क्वचिन्मामपि संस्मर त्वम् ॥२१९॥

दयालुमिश्राणां सप्त पद्यानि

स्वस्ति समस्तसामन्तसीमन्तिनीसिन्दूरपूरास्ताचलनिष्कृपकृपाणधारा-
वलुप्तदृप्तमेदिनीपतिमण्डलीमण्डितचण्डीशमूर्त्तिमहीमण्डलबलवदखिलखल[3]दलन-

---

१. C नो. २. C transposes नल्पे and जल्पे. ३. AC om. °खल°.

लीलाखण्डलनिखिलधरातलाखण्डलश्रीमच्चक्रवर्त्तिपरोपकारमात्रनिदानसेवन-
सावधानेषु १ अनवरतप्रतन्यमानमहादानसन्तानसन्तोषितोर्वीसुपर्वप्रणीता-
शीर्वादमोदमानमानसयशोराजहंसोल्लासलीलानिवासमानसामन्दमन्दरगिरिप-
रिक्षुभितक्षीराब्धिमध्योल्लसल्लोलकल्लोलविमलसूक्तिमुक्ताफलकलापालंकृतकण्ठ-
नालानेककलाविलासोपहसितसितकमलकलानिधिनिरवद्यसद्विद्यानवद्याश्रयप-
योराशिषु विहितकरमोचनेष्वपि दत्तसमस्तजनकरावलम्बेषु २ क्षीरोदतनयासू-
यापरमुखकमलनिवसत्सरस्वतीषु ३ श्रीसर्वविद्यानिधानकवीन्द्राचार्यसरस्व-
तीषु ॥ ४ ॥

विश्वेश्वरभट्टानाम्

स्वस्ति श्रीमत्समस्तप्रशस्तिरत्नावलीनदराजपूरेषु १ परितः प्रसृत्वरसार-
स्वतप्रतिभानुबन्धकोरकितकविताकलावतीकर्णपूरकमलमकरन्दसन्दोहसूक्तिषु २
शारदशर्वरीदयितगर्वसर्वंकषकीर्त्तिकल्लोलिनीपूरप्रक्षालितनिखिलाशामत्तकाशिनी
वदनमण्डलेषु ३ स्वमात्रवृत्तिधर्मावच्छिन्नयावद्दोषाभावव्यक्तिकूटाधिकरणताकेषु
४ यावद्गुणाधिकरणतावच्छेदकस्वमात्रवृत्तिधर्मेषु ५ विविधतर्ककर्कशोक्तिनि-
रस्ताखिलनास्तिकराद्धान्तदर्शिताक्षपादपर्यायभावेषु ६ विषमतरन्यायनिकर-
दर्शितानेकवचनव्यक्तिनिर्णयपरिनिष्ठाविवृताखिलप्रवचनप्रवर्त्तितविविधाध्वर-
निर्वृताखिलान्तर्वाणिनिर्णीतजैमिनिमूर्त्तिप्रतिनिधानेषु ७ निरन्तरविस्रियमाण-
बादरायणदर्शनदर्शितानेकोपनिषद्रहस्यपरिशीलितानेकदहराद्युपासनाभ्याससमा-
सादितपरमतत्त्वनानापाराशरिपरिचर्यमाणचरणेषु ८ परिच्छिन्नपुरुषप्रधानपरि-
शुद्धसत्त्वानेकान्तेवासिनिश्चितकपिलासुरिपंचशिखादिसिद्धान्तेषु ९ विदितसं-
प्रज्ञातासंप्रज्ञातसमाधिनिर्द्धूताखिलकषायमानसनानामस्करिकमलभास्करेषु १०
पिठरपीलुपरिमर्शपरिभाव्यमाननानाक्षणगणानुबद्धकाणादवादबहुतरवर्टुपरिसेव्य
मानेषु ११ सततप्रदर्शितविविधविरिञ्चं(?)कालपुरुषवचनोपग्रहसुपतिङ्विभागप-
रिकल्पिताखिलशब्दाकूपारपरब्रह्माभिनिवेशशंसितदाक्षीतनयतत्त्वेषु १२ अर्थ-

---

१. B om. °खण्डल° to °निदान°. २. B °खण्डलेषु for °सावधानेषु. ३. C om. °परि°. ४. AC om. °ल्लोल.° ५. C om. °सूक्ति.° ६. C वीरे° for विश्वे° ७. C. adds °बहुतर° again. ८. C. °बदु. ९. Shall we read विरुद्ध ?

प्रकृतिपञ्चकोपक्षेपादिचतुःषष्टिमुखादिपञ्चकपरिशुद्धरूपकोपरूपकविरचनादि[2]-विदितकवितावैभवेषु १३ स्वरविवृतिपूर्वाङ्गपराङ्गभावाद्याविःकरणविज्ञातास्खिल-प्रातिशाख्यसारेषु १४ निरन्तरपरिशोधितशुद्धकूटादिकाकल्यन्तरांशग्रहादिस्वर-तत्त्वदेशीमार्गादितालावलिधुतविधुतादिनृत्तभेदविवृतिविवृतभरतावतारेषु १५ श्रीमत्परमहंसपरिव्राजकाचार्यश्रीसर्वविद्यानिधानकवीन्द्राचार्यसरस्वतीषु निरन्त-राज्ञाकारिणः कमलनयनदीक्षितस्य नारायणोपनिबन्धपूर्विकाः प्रणतयः ॥

किं च ॥

१. येनाखिलस्य जगतो हि करग्रहाणा-
मुन्मोचने विरचिता न मनागुपक्षा ।
तेनैककस्य वपुषा नियतस्य भूमी-
देवस्य मोचनविधौ कथमित्युदास्यम्[3] ॥ २२० ॥

श्रीकमलनयनदीक्षितानाम्[4] ॥

स्वस्ति श्रीमत्सकललोकहितविहितावतारत्रिजगन्मण्डलायमानगुण-ग्रामाभिरामदिल्लीश्वरविश्रामधामसमासादितसर्वकामकमनीयमूर्त्तिषु १ श्रीसर्व-विद्यानिधानकवीन्द्राचार्यसरस्वतीषु ॥

परमेश्वराचार्याणाम्[6]

स्वस्ति श्रीमद्गण्यपुण्यविराजमानविविधगुणगणोदारलसदमन्दपाण्डित्य-तिरस्कृतानेकवादीन्द्रवृन्दवशीकृतसुरत्राणसद्गोष्ठीकनिष्ठीकृतानेकसुरपतिसमा-नसामन्तमण्डलोपार्जिताखण्डकीर्त्तिधवलिमधवलिताशेषभुवनविस्तरेषु १ श्रीसर्व-विद्यानिधानकवीन्द्राचार्यसरस्वतीषु ॥

१. यदुक्तं भवद्भिः परिव्राजकेन्द्रैः कवीन्द्रैर्मुनीन्द्रै रहस्यादरेण ।
विधेयं तदेव प्रभुं चिन्तयित्वा यथा शं भवेज्जीवतामाशु भूमौ॥ २२१॥

ब्रह्मगिरेः

१. गीयन्ते कीर्त्तयस्ते विविधमतियुतैः पण्डितैः सत्सभायां
शुद्धानन्दस्वरूपो निखिलगुणनिधिर्ज्ञानकारुण्यसिन्धुः ।

---

१. B. om. अर्थप्रकृति to पञ्चक. २. A. विरचनाविदित. ३. B. कथमप्यु°. ४. B. om. श्री. ५. AC मण्डलमण्डनाय. ६. C om. कवीन्द्राचार्य to परमेश्वराचार्याणां. ७. BC om the whole portion from स्वस्ति to भूमौ.

विद्वद्वृन्दाभिवन्द्यः सुरगुरुसदृशः पुण्यलावण्ययुक्तः
श्रीमान्धीमान्कवीन्द्रो जयति परमुदे प्रत्यहं द्वारि साहेः ॥ २२२ ॥

२. काश्यां श्रीकोशलायां परममतियुताः पुष्करे नैमिषेये
कान्त्यां श्रीकामरूपे प्रविहिततपसस्सेतुबन्धे प्रयागे ।
ब्रह्मज्ञानावलीढा विदितगुणवरा द्वारवत्यां प्रमोदै-
स्ते ते ध्यायन्ति शश्वद्विबुधगणनुतं श्रीयतीन्द्रं कवीन्द्रम् ॥ २२३ ॥

त्वरितकविरायस्य ॥

१. खद्योता मिहिरन्ति यर्हि सहसा सिंहन्ति शालावृकाः
कर्पूरन्ति रसोनकन्दशकला वेदन्ति मिथ्या गिरः ।
चक्रांगन्ति वका द्विषन्ति महिषाः शेषन्ति वा राजिला
ग्रावाणो मणयन्ति तर्हि यतयः श्रीमत्कवीन्द्रंत्यपि ॥ २२४ ॥

२. यशसामन्यनृपाणां धान्यं वारां यथोपरि प्रायः ॥
जगति तथैव यशस्ते जयति समस्ते कवीन्द्र कुन्दाभम् ॥ २२५[2] ॥

रामभद्रवाजपेयिनाम्

१. त्वद्दामोद्दामनीरोद्भवसलिलनिधिस्त्वद्यशस्ताम्रपर्णी-
सम्पाते भासमेते दिनकरहिमगुद्वंद्वपेशीपुटे यत् ।
मुक्तं त्वद्वैरिनारीनयनजलधरैरम्बु तस्मात्ततस्तां[3]-
स्तारा मुक्तास्तु तारा इति जगति धियं तन्वते श्रीकवीन्द्र ॥२२६॥

मौनीरङ्गनाथभट्टानाम्[4]

---

१. After v. 223; AC add the following verse:—
कर्पूराभा कराभा कृतकलितकला कामदा कान्तियुक्ता
कार्णाटे कल्पवल्ली सितकमलरुचिः काशभासा प्रकाशा ।
काम्या कल्याणदा संकलयति कलितं कर्म कैवल्यजातं
कैलासे का समाना कलिकलुषहरा श्रीकवीन्द्रस्य कीर्तिः ॥

२. AC give the following verse instead of verse 225:—
प्राचामिव कविवाचां धान्यं वारामुपर्युपर्येव ।
जगति कवीन्द्र यशस्ते गौरं गुरुमत्र मौनयति ॥ cf. verse 227

३ C तस्मात्तु जाता. ४. B om मौनीरङ्गनाथभट्टानाम्.

१. मुक्तास्तु तारा इति जवा(?)न्धान्यं वारामुपर्युपर्येव ।
जगति कवीन्द्र यशस्ते गौरं गुरुमत्र मौनयति ॥ २२७ ॥

२. कविकुमुदवनीविकासशाली निजमहसा सहसार्यपूरिताशः ।
परिचितपरविष्णुपत्कलावान् स जयति कोऽपि [1]कवीन्द्र एष चन्द्रः२२८

३. यज्ज्योत्स्नाप्रसरेण भाति जगती कृत्स्नापि विष्वक् परम्
वारंवारमहो महोदधिजया धारेयमित्यद्भुता ।
प्रेम्णा संप्रति साधुसंसदि वरस्यास्तां तवार्याधिकम्
श्रीमन् धीरकवीन्द्र संप्रति पदं ज्वालामुखी संमुखी ॥ २२९ ॥

४. पद्माश्रयः सततशोणतरङ्गरेखाराजीभिरंचिततलः किल विद्रुमाभः ।
सुत्रामतापपरिपालितसर्वगोत्रः संपत्करस्तव कवीन्द्र करः समुद्रः ॥२३०॥

५. मोदस्वारं धरायां प्रविततसुयशाः सर्वसंपत्तिधूर्भूः
श्रीमान् धीमान् गुणाढ्यः परजितविषयः कौतुकी साहसी त्वम् ।
नित्यं प्रीतः प्रसन्नास्त्रिपुरहरगतिः शर्मदः शौर्यवृत्ति-
श्चित्रैः स्तोत्रैः पवित्रैः सुकृतकृतमतिर्वत्सरान् भूरिशः सन् ॥ २३१ ॥

स्रग्धरेयम् । अत्र प्रतिचरणं शरर्तुहयवसुवर्णान् विहाय मन्दाक्रान्ता भवति । यथा ।

६. मोदस्वारं विततसुयशाः सर्वसंपत्तिधूर्भूः
श्रीमान् धीमान् रजितविषयः कौतुकी साहसी त्वम् ।
नित्यं प्रीतः पुरहरगतिः शर्मदः शौर्यवृत्ति-
श्चित्रैः स्तोत्रैः कृतकृतमतिर्वत्सरान् भूरिशः सन् ॥ २३२ ॥

शरादारभ्येन्द्रपर्यन्तान् वर्णान् विहाय शालिनी भवति । यथा ।

७. मोदस्वारं सर्वसंपत्तिधूर्भूः
श्रीमान् धीमान् कौतुकी साहसी त्वम् ।
नित्यं प्रीतः शर्मदः शौर्यवृत्ति-
श्चित्रैः स्तोत्रैर्वत्सरान् भूरिशः सन् ॥ २३३ ॥

शरर्तुशैलाक्षरत्रयं पंचदशात्पादान्तपर्यन्तानि चाक्षराणि विहाय भ्रमर-विलसितं भवति । यथा ।

---

१. C धार for कोऽपि.

८. मोदस्वारं प्रविततसुयशाः श्रीमान् धीमान् पराजितविषयः।
नित्यं प्रीतास्त्रिपुरहरगतिश्चित्रैः स्तोत्रैः सुकृतकृतमतिः ॥ २३४ ॥

शर्तुहयवसुवर्णान्विहाय पञ्चदशादीनन्तपर्यन्तांश्च वर्णान् विहाय हंसी भवति। यथा।

९. मोदस्वारं विततसुयशाः श्रीमान् धीमान् राजितविषयः।
नित्यं प्रीतः पुरहरगतिश्चित्रैः स्तोत्रैः कृतकृतमतिः ॥ २३५ ॥

आद्याक्षरचतुष्टयमात्रमादाय कन्या भवति। यथा।

१०. मोदस्वारं श्रीमान् धीमान्। नित्यं प्रीताश्चित्रैः स्तोत्रैः ॥ २३६ ।

पञ्चषट्सप्ताक्षरत्रयमादाय मध्या भवति।

११. धरायां गुणाढ्यः। प्रसन्नः पवित्रैः ॥ २३७ ॥

अष्टमाद्यक्षरसप्तकमादाय मधुमान् भवति। यथा।

१२. प्रविततसुयशाः पराजितविषयः।
त्रिपुरहरगतिः सुकृतकृतमतिः ॥ २३८ ॥

पञ्चदशाद्यक्षरषट्कमादाय गायत्री भवति। यथा।

१३. सर्वसंपत्तिधूः कौतुकी साहसी।
शर्मदः शौर्यवृत् वत्सरान् भूरिशः ॥ २३९ ॥

अन्तिमाक्षरमात्रमादाय श्रीर्भवति। यथा।

१४. भूस्त्वन्तिः सन् ॥ २४० ॥[1]

प्रथमाक्षरद्वयं गृहीत्वा स्त्रीछन्दो भवति। यथा।

१५. मोदश्रीमान्। नित्यं चित्रः ॥ २४१ ॥

तृतीयचतुर्थाभ्यां सैव भवति। यथा।

१६. स्वारं धीमान्। प्रीतः स्तोत्रैः ॥ २४२ ॥

नवमादिषड्भिरक्षरैर्नगणसगणाभ्यां गायत्री भवति। यथा।

१७. विततसुयशा राजितविषयः।
पुरहरगतिः कृतकृतमतिः ॥ २४३ ॥

पञ्चदशादित्रयेणाष्टादशादित्रयेण च प्रत्येकं रगणेन मृगी भवति। यथा।

१८. सर्वसंकौतुकी। शर्मदो वत्सरान्।
पत्तिधूः साहसी। शौर्यवृद्भूरिशः ॥ २४४ ॥

---

१. BC om. सर्वसंपत्ति to सन्.

अष्टमाक्षरादि गृहीत्वान्त्यमक्षरं विहायातिजगती भवति। यथा।

१९. प्रवितत्तसुयशाः सर्वसंपत्तिधूः
परजितविषयः कौतुकी साहसी।
त्रिपुरहरगतिः शर्मदः शौर्यवृत्
सुकृतकृतमतिर्वत्सरान् भूरिशः ॥ २४५ ॥

तृतीयादा सप्तमं नवमदशमाभ्यां च पञ्चदशाद्यक्षरत्रयेणान्तिमेनचेन्द्रवज्रा भवति। यथा।

२०. स्वारंधरायां वितसर्वसंभूर्धीमान् गुणाढ्यो रजिकौतुकी त्वम्।
प्रीतः प्रसन्नः पुरशर्मदोति स्तोत्रैः पवित्रैः कृतवत्सरान् सन्॥२४६॥

प्रथमे आद्याक्षरचतुष्टयं गृहीत्वा सप्तदशान्त्याक्षरद्वयं च गृहीत्वा द्वितीये पादे[1] चाद्याक्षरादासप्त तथान्त्यं च गृहीत्वा तृतीये चाद्याक्षरचतुष्टयं गृहीत्वा[2] तथाष्टादशोपान्त्याक्षरद्वयं च गृहीत्वा चतुर्थे चाद्यादासप्त तथान्त्यं च गृहीत्वा आर्यागीतिर्भवति। यथा।

२१. मोदस्वारं स भूः श्रीमान् धीमान् गुणाढ्यस्त्वम्।
नित्यं प्रीतः शौर्यवृत् चित्रैः स्तोत्रैः पवित्रैः सन् ॥ २४७ ॥

२२. शशौ शूरभूवह्निमीमाररिर्वः शरं वा विगौजीवरीयद्युगाक्षः।
पदाद्यन्तवर्णद्वयाहूयमानं सुखायास्तु तद्दैवतं श्रीकवीन्द्र ॥ २४८ ॥

२४. उदयाचलचरमाचलकूटद्वयसङ्गतायामा।
विधिनान्वबन्धि[3] धवला वन्दनमाला[4] कवीन्द्र कीर्तिस्ते ॥ २४९ ॥

२५. हारं न तारं कलये न हारं देवादगारं[5] न च हारसारम्।
साहारमीपद्भवतः[6] सहारं हारं पुरं प्राप्य परं विहारम् ॥ २५० ॥

२६. तन्द्रालु का दिसतसे भवदीय मुद्रा
कां यां न ये कविवरा दिनरात्रि निद्रा।
सांगेन तूज निजगूज महीमहेन्द्रा
देणें असे मज शतद्वय रौप्यमुद्रा ॥ २५१ ॥

२७. पर्याय हा होय सुरद्रुमाचा द्वितीय किंवा सुरभिग्रथेचा।
विकल्प नेणो अमरामणीचा कवीन्द्र मी वर्णिन कीर्तिवाचा ॥२५२॥

---

१. C. om. पादे. २. AC. om. गृहीत्वा. ३. C विद्यानुबन्धि, A °न्नबन्धि. ४. C चन्दन° for वन्दन°. ५. C दैवाद°. ६. C °मेतद्भवतः.

२८. ह्यानीं कल्पद्रुहासमान दिसतो जो भासतो सर्वदा
धैर्यें सागर हाचि शौर्यविभवें[1] राधेय वाचें वदा ।
बुद्धीनें दुसरा बृहस्पति खरा रूपें स्मरातें स्मरा
काव्यालापकलाकलापवचनीं श्रीभोज हा आदरा ॥ २५३ ॥

२९. सलिलनिधि कुपेचा नामधारी त्रपेचा
जनककवि गयेचा बाधतो येक येचा[2] (?) ।
मुकुटमणि सभेचा मार्गकृत्सौरभेचा[3]
अति मधुर जिभेचा दुःकवीन्द्र प्रभेचा ॥ २५४ ॥

३०. तुजविण मज पाहे कोण आहे कवीन्द्रा
प्रभुवर दुसरा या भूतला कीर्तिचन्द्रा ।
त्यजुनि[4] कविकुलाच्या पोषणी दूरि तन्द्रा[5]
विभवजितमहेन्द्रासक्त होई सुभद्रा ॥ २५५ ॥

३१. श्रीकामधेनु जगतीवरि आजि आली
किंवा स्वयें त्रिदशनायक भूरुहाली ।
कीं मागुती प्रकटली नृपभोजमाया
श्रीमत्कवीन्द्र सकलां कविला पुसाया ॥ २५६ ॥

३२. तूझ्यानि साम्ये प्रभु कोण आहे
जो पंडितांची बहु दाटि साहे ।
स्वानंदसंपूर्ण कवीन्द्र राहे
आत्मीयभावें मजलागि पाहे ॥ २५७ ॥

३३. घनधनवसनांतें पण्डितांलागि देसी
अतिचतुरकलावान् कीर्त्ति हे सर्व देंसी ।
सकलजनविसांवा धैर्यपाथोधि होसी
म्हणउनि कविला या श्रीकवीन्द्रार्य पोंसी ॥ २५८ ॥

३४. अति चतुर कलाचा जाणता कोण मानी
अभिनवनगरीं या नांदतो कर्ण दानीं ।

---

१. C °विषये. २. C बाधते येक पेचा. ३. C °भा°. ४. C सजुनि. ५. C °चंद्रा for °तंद्रा.

कविवर पुसतों मी आदरें सांग कानीं
यतितिलककवीन्द्रालागि गाईन गानीं ॥ २५९ ॥

३५. षीयूषद्रवसारिणीव सुमनःसौहित्रसंवर्द्धिनी
स्वास्थानीव कलाकुलस्य सरसा कल्याणकल्लोलिनी ।
नीवृद्बंद्यकवीन्द्रभूपपरिषच्चेतश्चमत्कारिणी
वाणीयं सुमते त्वदीयवदनांभोजात्समुज्जृंभते ॥ २६० ॥

३६. देतसे कविवरासिं मोहरा जो असे प्रभुवरात मोहरा ।
तेजसा सम दिसे[1] तमोहरा तो वसे[2] सुखपदी मनोहरा[3] ॥ २६१ ॥

३७. प्रतापतपनः परं निलयनं कलानामयम्
प्रचण्डवरपण्डितप्रकरलक्षदाता स्वयम् ।
जयन्तजनकाद्वयं समुपगम्य पुण्यालयः
क्षितीन्द्र तिलकीकृतो विजयते कवीन्द्रः कृती ॥ २६२ ॥

यश्च ।

पुण्यवतामधिवासो वासव इव वसुधामवतीर्णः । सद्वधिर्धैर्यस्य[4] । परिधिः शर्मणाम् । शेवधिः कविसमुदायस्य । आधिर्विरोधिवर्गस्य । व्याधिरविद्यायाः । विततोपाधिः । दूरीकृतोपधिश्च । भानुरिव प्रवर्त्तितविमानप्रसरः । संवर्द्धितविविधसन्निधिः श्रुतिमार्गाविरोधी । सिन्धुः शौर्यस्य । अन्धुः साधुतायाः । बन्धुर्विद्वद्वृन्दस्य । सीमा सौजन्यस्य । विश्रान्तिस्तितिक्षायाः । आरामो रामणीयकस्य । धाम धर्मस्य । मर्म सत्कर्मणाम् । निलयनं[5] कलाकलापस्य । आलवालं वादि[6]सबलतायाः । प्रासादः सदाराधनस्य । उपधानं विमलकमलायाः । विपणिरगण्य[7]गुणगणमणीनाम् । पद्या सद्विद्यायाः । आदर्शः सर्वशास्त्राणाम् । शृणिरुन्मत्तद्विपानाम् । पत्तनं सत्य जातस्य । पस्त्यं स्वस्त्ययनस्य । मूलं श्रुतिकलस्य । वण्टापथः पटुतायाः । शृङ्गारर्कः शृङ्गाररसस्य । वरुणालयः करुणायाः । तत्त्वं[9] सत्त्वगुणस्य । कान्तारं कुबुद्धीनाम् । मरुः पापपयसः । पात्री मैत्रीकरण[10]स्य । आलोको

१. AC ते जनासमा°. २. AC वसो. ३. C नमो° for मनो°. ४. Emendation Mss read सद्वधि धैर्यस्य. ५. A निलयं for निलयनं. ६. C व्याधि° for वादि°. ७. B °रगणाप° for °रगण्य°. ८. AC °पथः. ९. AC सत्त्वं. १०. AC करू°(cद्द)णस्य.

लौकायतिकस्य[1]। निदर्शनं दर्शनीयतायाः। ज्वलनकीला द्विषद्दैन्योपलस्य[2]। परशुः परवेदनाकाननस्य। आलानं मानमतङ्गजस्य[3]। उपदेशकः परोपकारस्य। प्रवर्त्तकः सत्रचित्रस्य। मार्गोपदेष्टा शिष्टाचारस्य[4]। आधारः संधावन्धस्य। केदारः प्रमोदानाम्। सार्थः परमार्थानाम्। ग्रन्थिरतिथिपुरस्कारस्य। संवर्त्तः शत्रुवार्त्तस्य। ऊषरं खलतालतायाः। कपाटं कपटाचरणस्य[5]। वाटपाटचरः (?) शरणागताधीनाम्। निधानं सर्वमन्त्राणाम्। निदानं सर्वसंपत्तीनाम्। जेता सकलविनतानियमस्य[6]। केतुर्विनयस्य। सेतुः कीर्तिपूर्तस्य। अहेतुः कोदण्डपाण्डित्यस्य। दानुः सर्ववर्णानाम्[7]। चित्रभानुः शात्रवान्धाकाराणाम्[8] दिग्विलासिनीकर्णपूरीकृतकीर्त्तिपल्लवोऽपि निवारितनिजाश्रितविपल्लवः। बल्लवबालक इव विश्वपालको ध्वंसितकंसश्च। शूर इव सद्वृत्तरसः। हरिरिव प्रतीतविक्रमः। घन इव प्रसारितापः। भागीरथीप्रवाह इवास्खलितगतिः पावनश्च। परिवादरतोऽपि परिवादपराचीनचेतोवृत्तिः सुभाषितव्यसनी। भास्वानप्यपरोपतापी। पुण्याचलोऽप्यस्तम्भी। पुण्यसान्द्रः संवर्द्धितविद्वद्वृन्दः परोपकारनिस्तन्द्रो यतीन्द्रः कवीन्द्र इति ॥ १ इति प्रथमा ॥ १ ॥

३८. सदाचरणचातुरीसहचरीकृतं संततं
कलामलकुलांचितं प्रणयभंचितं श्रीजितम्।
प्रणीयशरणीकृतं स्तुतफणीशवाग्वेदिभिः
कवीन्द्रमहमाश्रयेऽवितुमथोत्तमर्णग्रहान् ॥ २६३ ॥

यं च

निःस्नेह इति दोषैर्नीरस इत्यपयशसा दुःस्पर्श इति दुर्व्यसनैरकरुण इति कारणाभिः सकल[9] इति कलिना शरीरीत्यशरीरिणा शस्त्रीति[10] परस्त्रीभिः भीरुरिति परस्वेन सहेतिरिति[11] प्राणिहत्या विशिष्ट[12] इति नष्टबुद्ध्या मनागप्यनाकलितम्[13]। समुद्रमिव महावाहिनीशपतिम्। धनञ्जयमिव महाभारतरणयोग्यम्। संकेतायतनमिव नीतीनाम्। आस्थानमण्डपमिव स्थितीनाम्[14]।

---

१. B लौकिकस्य. २. B विद्वद्दैन्यो°. ३. A °गस्य. ४. AC om शिष्टाचारस्य. ५. AC कपटाचारस्य. ६. B सकविनेता. ७. AB दातुः. ८. C सवर्णानां. ९. AC °प्यस्तं नै°. १०. C सकरुण. ११. AC शस्त्रे for शस्त्रीति. १२. AC संहृति°. १३. AC °हस्याच(cव)शिष्ट. १४. C मनागनाञ्जलितं. १५. AC om. स्थितीनां to वरुणालयमिव.

सर्वस्वमिव पराक्रमाणाम्। बीजमिव विबुधसञ्जीवनतरूणाम्। वरुणालयमिव शरणागतानाम्। धर्मराजमपि सुयोधनम्। नीलेन्दीवरसोदरनयनमपि वन्दित-त्रिलोचनम्। तीर्थं तथ्यस्य। कोशं कुशलतायाः। प्रतानं प्रणयितायाः। चन्द्रशालातलं सुशीलतायाः। भीष्ममिव भागीरथ्याः। कुमारमिव गिरिजायाः। दामोदरमिव देवकनन्दिन्याः। जयन्तमिव पुलोमजायाः। परीक्षितमिवोत्तरायाः। भरतमिवशकुन्तलायाः। प्रेमपात्रं परिणतशेमुषीनिजजननीसदुदरखनिरत्नभूतम् बहलप्रभापटलनिर्विषयीकृतचन्द्रचण्डातपाच्छ[2]छविपुञ्जं सततवसुमतीपालमौलि-हीरांकुरैर्नीराजितचरणसरोजं राजराजमिव शेवधीनां विश्वामित्रमिव सिद्धीनां शतक्रतुमिव समृद्धीनां काव्यमिव नव्यभव्यकाव्यानां भर्त्तारम्। शरणागत-त्रासहर्त्तारम्। शार्दूलमिव मृगाणाम्, सिंहमिव मातङ्गानाम्, गरुत्मन्तमिव पन्नगानाम्, श्येनमिव खगानाम्, खलानां परमोद्वेगकर्त्तारम्। समुचितमृगमद-परिमलवाहिनांगरागेण राजमानं मूर्त्ताभिधानं पुण्यावदानं संपन्निदानं सामिति संमुखो[3]पचितवाङ्मुखश्रुतिसावधानं[4] मङ्गलसंविधानं कृतविविधविधानं सं-पादितबिन्दुवृन्दविधानं द्वारोच्छ्रायितविधानम्, भूतिमन्तमपि[6] स्नेहमयं जगत्प्राण-मयमपि तेजस्विनं पार्थिवमपि गुणमयं घनरसात्मकमपि शब्दगुणप्रसादं दक्षिणाशाप्रसाधँकमपि प्रचेतसं सदुत्तरमपि शुनासीरं सदम्बरमपि ऊर्जित-कम्बलं दधानम्। घनागममपि समुत्सारितपङ्कम्। निर्जिताखिलभूभृतमपि गोत्र-वर्द्धनम्। सुरभिमिव सुमनसां गुणप्रकाशकं पृथुमिव प्रसादितपृथ्वीतलं नागलोकमिव भोगिसंपन्नम्। चापमिव सद्वंशजातं द्विरदमिव दानभृताम-ग्रगण्यम्। कुलाङ्गनामिव अनन्यगम्यां प्रभुशक्तिमुद्वहन्तं रविकुलमिवाकुल-कविकुलैंकोकलोकमानन्दयन्तं चिन्तामणिमिव श्रीसंनिधानरमणीयम्। शतमन्यु-मिव शास्त्रानल्पलोचनं सुहस्तमप्यविहस्तम्—सत्कवितावितानितभूमिप्रसराः कविवरविसरैः[11] निजनिजसूक्तिमौक्तिकैः सोत्साहमहमिकया प्रयासहासं सन्ततं परिस्तुवन्ति सकलपरानन्दसान्द्रं योगिधुरंधरधौरेयकपारीणं[12], विद्याम्भोधि-पारीणं यतिकुलचन्द्रं कवीन्द्रमिति द्वितीया ॥ २ ॥

---

१. C को° for कु° २. AC तपाकच्छवि°. ३. B सुखो° for संमुखो°. ४. C °साधनं. ५. C om. वि. ६. B भूतिर्मापि. ७. C °प्रसाद°. ८. A सुरभितमिव. ९. AC om. सुमनसां to द्विरदमिव. १०. AC om. कविकुल. ११. AC om. कविवरविसराः. १२. B धौरेयधुरीणं C धौरेयकधु°.

३९. प्राची शचीसहचरेण विकासहासम्
वासन्तिका सुरभिणा करिणापि सेना ।
कौलीनताच विनयेन नयेन संपत्
दिल्लीशसंसदपि पाति[1] कवीन्द्रधाम्ना ॥ २६४ ॥

येन च

सर्वदाकारि सत्कर्मनर्मपरंपरा । कृतं कृतयुगवत्कलिधर्माचरणम् । प्रणयेनासादिता गुरुजनाशिषः । रभसोत्सारितानि शिवश्लोकैर्दुःस्वप्नदुर्निमित्तानि । सम्यगभ्यस्ताः सुविद्याः । विधिवदाराधिताः सभ्याः । प्रपंचेनोपासिता वृद्धयः । मुदाभ्यर्चितानि सदैवतानि दैवतानि । संमोदितास्सदासि वसनाशनभूषणादिभिर्भूनिर्लिपाः । प्र[परि]क्रमणानमनस्पर्शन[नैः]परिशीलिताः सुरभयः । नरसिंहेनेव खरनखरकुठारकोटिविदारितामितबलवदरिसपक्षदैत्यपक्षवक्षःस्थलेन । नलनहुषाम्बरीषपरीक्षितां सुकृतां वृत्तिमनुसरता । सुधावता हरिणांचितेन जैवातृकेणोपमितेन । ग्रीष्मवर्षागमसमयेनेव सर्वत्र संवर्द्धितायेन । शचीपतिनेवात्मनुतौ साचिकृतवदनेनाप्यानन्दसदनेन । क्ष्माभृदाश्रितपदेनापि विपदपदेन । सहृदयेनाथ सुहृदयवेदिना । सुग्रीवेणापि सुवृत्तहनुमता । रामेणापि पुण्यजनोपकारिणा । विनतानन्दनेनापि दीर्घपृष्ठेन । विनायकेनापि कविनायकेन । विशालनेत्रेणापि सूक्ष्मतरनेत्रेण । वन्दितामित्रेणाप्यानन्दितामित्रेण । समुचितमनुनापि वसिष्ठेन । यमुनाप्रवाहेणेवामुना चक्रवता सुरतरङ्गिणीव विभ्रमवती[9] चित्तवृत्तिरभेदि । पवित्रेण[10] नदीनेनाप्यनीचवृत्तिपूर्णेन । प्रशंसितवेशेन[11] सदोत्तमश्लोकगुणगानुनाथ न धनदानुना । पूतजानुना[13] धन्यतमेनानेनापरुषा[14] कविता वनितेवात्मसादकारि[15] । फलितप्रसारितकृणाक्रीडोद्यानेव जीवातुनार्येण[16] । द्विजराजीयराजतसंख्यावताप्यसंख्यपराक्रमेण । साक्षाद्वाचस्पतिनेवात्मनुतौ साचिकृतवदनेनाप्यानन्दसदनेन । क्ष्माभृदाश्रितपदेनापि विपदपदेन । सहृदयेनाथ सुहृदयवेदिना । सुग्रीवेणापि सुवृत्तहनुमता । रामेणापि पुण्यजनोपकारिणा । विनतानन्दनेनापि दीर्घपृष्ठेन । विनायकेनापि कविनायकेन । विशालनेत्रेणापि सूक्ष्मतरनेत्रेण । वन्दितामित्रेणाप्यानन्दितामित्रेण । समुचितमनुनापि वसिष्ठेन । यमुनाप्रवाहेणेवामुना चक्रवता सुरतरङ्गिणीव विभ्रमवती[9] चित्तवृत्तिरभेदि । पवित्रेण[10] नदीनेनाप्यनीचवृत्तिपूर्णेन । प्रशंसितवेशेन[11] सदोत्तमश्लोकगुणगानुनाथ न धनदानुना । पूतजानुना[13] धन्यतमेनानेनापरुषा[14] कविता वनितेवात्मसादकारि[15] । फलितप्रसारितकृणाक्रीडोद्यानेव जीवातुनार्येण[16] । द्विजराजीयराजतसंख्यावताप्यसंख्यपराक्रमेण । साक्षाद्वाचस्पति-

---

१. A घात; C यांति; Shall we read भांति ? २. B प्रणामेना°. ३. AC om. बल. ४. A सर्वो यति°. ५. C विपदा°. ६. AC °नापि. ७. B स्वहृदय°. C स्वहृदय°. ८. B पुण्यजनको°. ९. AB विभ्रवती; C °भ्रमवृत्ति. १०. B adds; अपि अपवित्रेण after पवित्रेण. ११. B adds अपि स्वप्नेनाशंसितवेशेन after °वेशेन. १२. C °गणानुनाथ. १३. AC om. पूतजानुना. १४. C करुषां १५. AC °वचितानिचितेवात्मसाद(C समाद)कारि. १६. AC नार्थेन

नापि कविना। सौम्येनापि भास्वता। मङ्गलाभिधानेनापि परापकृतिमन्देन, सुमतिना वसुमती कान्तिमतीव बभारेति तृतीया[1] ॥ ३ ॥

४०. येनावर्नीशकर्णे कुन्दसवर्णे[2]ऽवकल्पिता कीर्तिः।
नियतं निजस्य तस्मै भावुकमीहे कवीन्द्राय ॥ २६५ ॥

यस्मै च।

वृषोपस्थितचित्रभानुसमानधाम्ने। बृहद्भानुसंतापिततपनीयोपकृतोरु-गुटिका[3]कृतदाम्ने। सुकृतोच्छ्रायितवाचंयमोपस्तूयमाननाम्ने[4]। सर्वदोत्साह-परवशतयोपनीयमानान्यूनन्यूंखोचितसाम्ने। असंख्यसंख्यावज्जेगीयमान-गुणग्रामसीम्ने। सकलाशावकाशसेवासित[6]तामितविनयभूम्ने। महो-पचितसाधुवादानुचितविकत्थनाङ्गीकृतात्यन्तलघिम्ने। अखिलसुरभिसमाज संजीवनाविकलाय विनोदोपरतायापि विनोदपराय। सँशौटीरविन्दुवृन्द-गन्धाय। श्रमवच्छंबाय कलवत्कंवार्य संकल्पकल्पितानेककल्याणविशाला-शयाय[9] विद्वन्मेलकाय[10] संचारशौण्डाय कल्पितानेकविबुधोपायायानुष्ठानक-निष्ठीकृतवशिष्ठादिविशिष्टसमाजाय[13]। प्रतिसदनजायमानावदानपरंपरानन्द-सन्दोहकन्दाय रसरागरङ्गगीतिगमकगीश्चातुर्यचर्याचमत्कारविदग्धाय। अखर्वगुणगर्वपर्वताय सर्वोर्वीसुरश्रुतिसन्ततिसंश्रुतोदारचरिताय। अनवरत-मभिसंमं (?) श्रुतिस्मृतिधर्मप्रपंचश्रवणमननिदिध्यासनधारणासमाधि-साधारणयोगसाधनशमदमनियमसमापितकामक्रोधमदमत्सरदम्भलोभसंरंभाय। अहर्दिवमवनीतलतिलकीभूतविद्वज्जनसीमन्तिनीसमुदायाः सहसा स्पृह-यन्ति अविकलसकलोत्तुङ्गमङ्गलानि। गायन्ति च गृहकर्मारम्भेषु दोलाखेलासु निजनिजपाकसान्त्वनेषु कीर्त्तिपूर्त्तप्रवर्त्तकाय यतीन्द्राय प्राज्यमद्राय कवीन्द्रा-येति चतुर्थी ॥ ४ ॥

---

१. B om तृतीया. २. C om कुन्दसवर्णे. ३. C वृत°. ४. B adds साधु after स्तूयमान. ५. B °र्गाय°. ६. B °संवासिता. ७. C om स. ८. C श्रम-वच्छंबलंबायकत्वावत्कंवाय. ९. AB विशायाय. १०. AB विद्वन्मेलकार. ११. C विबुधाय. १२. B सत्कर्मानुष्ठी°. १३. A °दि. १४. C °मदोह°. १५. C om रंग. १६. C वर्य for चर्या. १७. C आवर्त्त°. १८. B °पर्वतापसर्वोर्वी. १९. A °धारण°. २०. AC अहर्दिन. २१. AC सीमंतिनः. २२. B समुदयाः. २३. C व for च. २४. A om सु. C दोलाखेलमुनिजनं. २५. C कीर्तिपूर्व°. २६. C om यतीन्द्राय to प्राज्यमंद्राय.

४१. चित्ते[1] चकोरी वसुधांशुमण्डलात्
स्वैरं मयूरीव बलाहकोदयात् ।
सत्यंविपश्चित्समितिः परां मुदम्
द्राग्याति[2] नित्यं सुमतेः कवीन्द्रतः ॥ २६६ ॥

ययातेरिव संस्तुतायतेः सुरभेरिव संपन्नजातेः वाचस्पतेरिव विबुधजन-संस्तुतमतेः[3] वाञ्छितविप्रलापादप्यञ्चितविप्रलम्भात्[4] विद्वद्वृन्दोदवसितानवरतसञ्चरदमितदैन्यदन्ताबलदलनकलाकोविदात्[5] दूषितनृशंसादपि तोषितनृशंसात् पूजितदेवादपि न्यक्कृतदेवात् । कुसुमप्रियादप्यपास्तकुसुमात् । कृतारिवर्द्धनादप्याश्रितवर्धनकारिणः । निर्जितशय्यादपि परिचितशय्यात् । सुमेरोरिव मित्रोदयहेतोः । पुष्पकेतोरिव सुमनोभरप्रमोददायिनः । सूर्यादिव दोषाकरम्लानिकरणात् । चिन्तामणेरप्यचिन्त्यप्रभावात् । सम्भावितासंख्य[6]संख्यावन्मुखकमलविलासवतीसरस्वतीपरिचितपुण्ययशसो हारीभूतविद्वत्कुलहरिश्चन्द्रादपि दानवीरात् । प्रवर्त्तितालौकिक[8]कविद्यात् । आबालभूपावधिजनसमूहाः परमोदारवाग्विलासपरिणतचातुरीचमत्कारं चिरतरं चित्तकोपे निरस्तदोषे सञ्चरन्तितरां यतिकुलमहेन्द्रात्[9] कवीन्द्रात् इति पञ्चमी ॥ ५ ॥

४२. कल्याणप्रसरोऽस्तु ते प्रतिपदं हर्षाश्रवस्याश्रव—
प्रावीण्याम्बुनिधेः परोदयविधेर्धैर्यावधेः श्रीजुषः ।
दोषध्वान्तनिवारणैकचतुरस्यास्नायहृद्वेदिनः
क्षोणीचन्द्र कवीन्द्र सद्गुणलसद्विद्वद्घटाकल्पद ॥ २६७ ॥

यस्य च ।

अत्यन्तप्रमोदमेदुर[10]बले रिवत्यागः स्थानेषु । सस्पृहता[11] शिबेरिव परोत्साहेषु । श्लाघा धाराधीशस्येव विद्वज्जनसंवादेषु । दम्भस्तु नलनहुषयोरिव स्वायत्तकवितालल[12]नाखेलासु । कृतज्ञता विक्रमार्कस्येव पुरुषवरेषु । सन्तोषः शङ्करस्येव कलाकलापकेषु । मैत्री[13] सुमित्रानन्दनस्येव[14] सदाचाररतेषु । संकोचः शचीसहचरस्येव[15] गुरुवचनेषु । खलता बिभीषणस्येव[16] चपलेषु । तत्परता

---

१. C वित्ते. २. B डारयति. ३. B °मते. ४. B °लापात्. ५. A नवरसाञ्च°. ६. A om संख्य. ७. B हारीभूताद्विद्वकुलस्या (C स्य). ८. B adds लोक after लौकिक. ९. C महौक्षात्. १०. B मेदुरस्य बले°. ११. A स्पृहता. १२. B स्वापत्र; A स्वावत्तक°. १३. AC मैत्रीमिव. १४. AC °नन्दनस्य. १५. AB शचीहर°. १६. C विर्ना°.

तारापतेरिव धर्मकर्मसु। विश्वासो व्यासस्येव श्रुतिप्रसूतस्मृतिप्रपञ्चेषु। प्रागल्भ्यं वसिष्ठस्येव सभ्यसभासु। तितिक्षा भरतस्येव क्षमातिलकेषु। वञ्चकता शर्यातेरिव पराङ्गनासंसर्गेषु। दया काश्यपेस्येव[1] दीनजनावनेषु। नियम[3]परिपालनं हरिश्चन्द्रस्येव[4] प्रतिज्ञातेषु। चिन्ताप्रतानिता गौतमस्येव शास्त्रतत्त्वेषु[5]। सदानुरागः काव्यस्येव नव्यनव्य[6]सत्काव्यप्रबन्धेषु। सौजन्यं विश्वामित्र-स्येव सत्रकृत्सु। दाक्षिण्यं क्षणदाकरस्येव क्षणलक्ष[7]णेषु। पाण्डित्यं गाण्डीव-धनुष इव कोदण्डोद्दण्डाकार्ण्डसज्जनेषु। शूरता शौरेरिव तरवारिपरिचयेषु। कारुण्यं रघोरिव शरणागताहिततमामितकुटुम्बकेषु। लुब्धतां[10] ऋतुपर्ण[11]कर्ण-योरिव लब्धवर्णसंमाननेषु[12]। भीरुता तापसस्येव परस्वहरणेषु। वन्दारुता अक्रूरस्येव वृन्दारकपदारविन्देषु। विदुरता विदुरस्येव बिन्दुवृन्दसंवादेषु। पराङ्मुखता दाशरथेरिव परापवादेषु। निदर्शनता गाङ्गेयस्येव कीर्त्तिमूर्त्तिषु[13]। दीर्घसूत्रता चित्रशिखण्डिजस्येव[14] कार्यारम्भेषु। कृपालुता जीमूतस्येवाभिमतजी-वदानसमयेषु[15]। विलासवशता शतानन्दस्येव तौर्यत्रिकेषु। सकलावनि-चक्रतिलकीकृतकीर्त्तिपल्लवस्य यतिवरकवीन्द्रस्येति षष्ठी ॥ ६ ॥

४३. प्रबले सकले जाते[16] कवीन्द्रेऽत्र धरातले।
कवीनामधि[17]वेश्मासन्नवीनाकल्पभूधराः ॥ २६८ ॥

यस्मिंश्च।

परापवादमूके सुजनसंजवनपरमानन्दकारके दङ्मात्रोत्सारितानेक-दुर्गतानीके प्रशस्तिमूलधारिणि क्षणाम्भोधिमध्यविहारिणि प्रसूनमालाभारिणि सुवन्दिवृन्दसंस्तुते। भृकुंशाभ्यसितलास्यलम्पटे प्रसारितोचितयशःपटे। विकस्वरसहकारनवपल्लवप्रसर[18]विराजमानकरपङ्कजोदरे महादानायातामित-याचकलोककोलाहलमुखरीकृतसंतता[19]जिरे। क्रमकोद्दीर्णमहोदीर्णविस्तीर्ण-वर्णस्वरक्रमश्रवणानन्दितश्रवणे। सन्ततोद्गीतोपनिषन्निनादप्रतिध्वनितसभा-

---

१. C प्रागालयं च मिष्टस्येव. २. B काश्यस्येव. ३. C नियत°. ४. AC हरि-श्चंद्रस्य. ५. B °तत्के(र्के)षु. ६. C °भव्य°. ७. C लक्षणलक्षणेषु. ८. Emendation. AB कौदण्डं दण्डोद्दण्डकाण्ड°; C कोदण्डोदण्ड काण्ड°. ९. C om. the passage from कारुण्यं to परापवादेषु. १०. A. लघुता. ११. B. अनुर्ण°. १२. B संमानवेषु. १३. AB कीर्त्तिषु. १४. B चित्रखण्डिजस्येव. १५. B. °समर्थेषु. १६. A याते for जाते. १७. AC कवीनामपि. १८. C. °प्रसर°. १९. A. संतता°.

मण्डपे। अभ्यसितपताकेष्युच्छ्रितकीर्त्तिपताके। परशुराम इव परशुभदायिनि। अष्टविधतुरगारोहणनिपुणे। तथाष्टधानृत्यकलापारगे। चतुर्विधवाद्यविद्याप्रवर्तके। षड्विधबलमालिनि[४]। अष्टावधानसंपन्ने[५]। समानेऽप्यसमाने। संमानितस्थविरेऽप्यसंमानितस्थविरे। परिचितविहारेऽप्यपरिचितविहारे[६]। भुवनरक्षके तोषितारक्षके कृतधर्मावापेऽपि न्यक्कृतावापे। शोभनपञ्चाङ्गेऽपि ऊर्जितसप्राङ्गे। पुण्यपरिग्रहेऽपि पुण्यश्लोकपरिग्रहे। कल्पितवेशेऽप्यकल्पितवेशे। कपाटवत्सेऽप्युत्सारितारिवत्से। दूरीकृतविषादेऽप्यूरीकृतविषादे[७]। राजनीतिनिपुणे तरुणारुणप्रकाशे स्वकीर्त्तिनर्त्तकीसुषमासंराजितसकलाशावकाशे[८] समस्तानवद्यविद्यानिवासे विद्वद्गुणग्रहणप्रमोदसान्द्रे समुल्लसदमन्दकुन्दसुन्दरयशोवृन्दमन्दीकृतचन्द्रे भव्यभक्तिसम्भार[९]प्रसादितसदा[१०]संमदानन्दामोदावलीमेदुरनिजहृदयेन्दिरामन्दिरासादितरुद्रे। सद्यः समुद्वदनहृद्यपद्याद्यनन्तविद्यासमुद्रे। महीतलमहामहीयमानमहेय[११]पुण्यश्लोकमुद्रे[१२](?)। महोदा[१३]नानिर्विकारससारसंसारपरोपकारानस्ततन्द्रे। [१४]निजनिजभावमुद्भावयंति कलाकलापैः समुल्लसन्तः सन्तः[१५] सतन्तं यतीन्द्रे विश्वंभराचन्द्रे श्रीमत्कवीन्द्रे इति सप्तमी ॥ ७ ॥

पट्टवर्द्धनमहादेवभट्टानाम् ॥

१. वाल्मीकिः प्रथमं बभूव तदनु श्रीव्यासदेवोऽभवत्
काव्ये[१६] विश्रुतकीर्त्तिरास तदनु श्रीकालिदासः कृती।
तेषां चारुयशो गुणोत्तम तिरोधत्से यतः सांप्रतम्
हे योगीन्द्र कवीन्द्र तावकमतो व्यक्तं जनैर्गीयते ॥ २६९ ॥

२. धीराधीश कवीन्द्र कुन्दकुसुमस्तोमत्विषि त्वद्यशो—
राशौ मग्नतया कया पुनरिमान् जानातु युक्त्या जनः।

---

१. C मण्डपेभ्युसित. २. C om कीर्त्ति. ३. C परशुन°. ४. AB मानिनि. ५. AC read अष्टविधसंयते. ६. C om विहारेप्यपरिचित. ७. A om प्यूरीकृत. विषादे. ८. C सकलावकाशे. ९. C संसार for संभार°. १०. A om सदा सं. ११. AB °महीपः. १२. C मुदे for मुद्रे. १३. C om सहोदान to °स्ततंद्रे. १४. A om निज to °द्भावयंति. १५. C om संतः. १६. C काव्येऽपि.

अङ्के रङ्कुमतः कलानिधिरधादीशो विशालेऽनलम्[1]
भाले[2] कालभुजङ्गमङ्गविषये श्रीखण्डभूमीरुहः ॥ २७० ॥

मैथिलस्य ॥

१. तर्के प्रोद्दामतर्कः फणिपतिभणितौ केवलं शेषवेषो
मीमांसायां च[3] मीमांसनकलितमतिः सांख्यसंख्यावदाद्यः ।
योगेऽत्यन्ताभियोगो निखिलगुणनिधिः ख्यातरीतिः सुनीतौ
वेदार्थाभिज्ञ एको जगति विजयते श्रीयतीन्द्रः कवीन्द्रः[4] ॥ २७१ ॥

दिवाकरभट्टानाम्

१. विद्वद्वर्य विभो कवीन्द्र भवतो योग्यान्[5] विशिष्टान् गुणान्
ज्ञात्वा तत्तदनन्तरोद्भवगुणग्रामोदयेऽपि स्थिरान्[6] ।
तन्नाशं प्रवदन्ति मूढमनसो ये तार्किकास्तेऽपि ते
युक्तायुक्तविचारशून्यहृदयाश्चित्रं तवेष्टाः[7] पुनः ॥ २७२ ॥

पुर्नविश्वनाथज्योतिर्विदाम् ॥

१. ये सन्तः पृथगाश्रयाः क्षितितले सद्भिः स्तुताः सद्गुणा-
स्तेषामेकतमे परार्थपरमे संभूय वासं क्वचित् ।
इच्छन् सत्फलमत्र[9] सद्गुणभृत[10]श्चातिप्रयत्नाद्[11]गुणान्
सर्वांस्तांस्त्वयि[12] सत्कवीन्द्रविबुधे वेधा व्यधात् सादरम्॥२७३॥
२. न स्वागन्तुकबाधकाः सुफलिनोऽप्येते कृतेर्भेदका
नाप्यन्याश्रयमाश्रयन्ति विकृतावप्यत्र कार्यक्षमाः ।
मीमांसाकुशलस्य तेऽपि किल चेदेवं गुणाः सन्त्यतः
श्रीमत्पूज्यकवीन्द्रवर्य भवतो नैवोपमानं क्वचित् ॥ २७४ ॥
३. धर्मं धर्मधनं धनञ्जयमथो शौर्येण सर्वोत्तमम्
भीमं भीमबलं च कर्णमसमं[13] दाने स्मरं देहिनम् ।

---

१. AC क्षणं for ऽनलं. २. AC काले. ३. B मीमांसातत्त्व°. ४. AC trans. यतींन्द्रः and कवीन्द्रः. ५. C योगान्. ६. A सत्त्व° C तत्त्व°.. ७. तदिष्टा. ८. AC om पुनः. ९. A मत्फल°. १०. C °भृतां. ११. C वाचि for चाति. १२. C सर्वांस्तान्विलसत्. १३. Ac °सदृशं.

द्रष्टुं वाञ्छसि चेत्तदा बुधवरं दिल्लीपुरं सादरम्[1]
गत्वा विज्ञ[2]कवीन्द्रवर्यविबुधं दृष्ट्वा सुखी त्वं भव ॥ २७५ ॥

४. नाप्राप्तप्रापणार्थं[3] न हि भवति तथा पूरणार्थं न चान्य—
व्यावृत्त्यर्थं तथापि प्रबलहतरिपो श्रीकवीन्द्र त्वदीयम् ।
प्राज्यं राज्यं परेषामनधिगतफलप्राप्तये देव यस्माद्
द्वेवाक्य(?)व्यायतो[4]ऽतो दशशतशरदो जीव भाग्यै[5]र्बुधानाम्॥२७६॥

५. न स्फोटो न खलु तवास्ति वर्णलोपो नो भङ्गः प्रकृतिषु नापि चोपसर्गः ।
नो पातस्तदपि सुशाब्दिकः कवीन्द्र ख्यातोऽसि त्वमिति[6] जेनषु चित्रमेतत् ॥

६. सर्वार्थः[7] सर्वदेवाप्तो[8] व्यावर्त्यो न कवीन्द्र ते ।
द्वे इत्याद्युक्तिवद्भाग्यमतोऽन्यफलसिद्धये ॥ २७८ ॥

७. विद्वन्नैवोपमा[9] ते किमपि न विषमं नापि दृष्टान्तसख्ये
सन्देहासंगती नो[10] धरणिसुरगुरोऽनन्वयो नो कवीन्द्र ।
व्याघातापह्नती न[11] प्रगुणगुणनिधे नो विरोधप्रतीपौ
साहित्याद्वैतभावो जगति विजयते तत्तथापीति चित्रम् ॥ २७९ ॥

८. वाणीशो यस्य वाण्यां नयनकमलयोः स्निग्धयोर्यस्य लक्ष्मी-
र्लक्ष्मीनारायणो यन्मनसि भुजयुगे यस्य हंहो हनूमान् ।
यस्य क्रोधे कृतान्तो यशसि शिशिररुक् यस्य यस्य प्रतापे
सूर्यो देवाश्रयं तं मनुज इह कथं नाश्रयेच्छ्रीकवीन्द्रम् ॥ २८० ॥

पुनर्भैयाभट्टानामष्टौ ॥

स्वस्ति श्रीमदखण्डमहीमण्डलाखण्ड[12]लापारकृपापारावारविश्रामधामनि-
कामकामाभिरामसकामागणितगुणगणै[13]कनिलयै[14]र्निजनियमविवशीकृताचलाव-
लयसमस्तवाङ्मयनिकाया[15]चरणपरैकलक्षदानमानसंभावनासंभावितानंतावनी-
वनीपकलक्षजेगीयमानातिमानकीर्त्तिमूर्त्तिनर्तकीसमधिष्ठितजगदङ्गणै[16]र्निजप्रताप-

---

१. B सागरं for सादरं. २. C °भिज्ञ°. ३. AB नाप्रापणार्थं. ४. C. वाक्ये, B. न्यायतो for व्यायतो. ५. C °वाक्यै° for °भाग्यै°. ६. C त्वमसि. ७. AB सर्वोऽर्थः. ८. AB °दैवाप्तो. ९. C विद्वत्तैवोप°. १०. A से देहासंगतीनां, C संदेहासंगतीर्णो. ११. AB अपह्नतिर्न. १२. C om खण्ड. १३. °गणै धुरिलय. १४. AC यत्र यक्ष B. निकाप्यत्रप्यक्ष. १५. AC दङ्गना.

कालानलकीलजालकलिताखर्वगर्व[1] विरुद्धगणमहोदारचरितादद्भुतपरोपकृतिसंतर्पितसकलजनोदीर्यमागजयस्वनेषु । श्रीमद्यतीन्द्रवर्यश्रीसर्वविद्यानिधानकवीन्द्राचार्यसरस्वतीषु ॥ १ ॥

वीरेश्वरभट्टमौनिनः ॥

उपदेष्टा सच्चेष्टानाम्॥ १॥भूमिर्भव्यतायाः॥ २॥ समुद्भवो वैभवस्य॥ ३॥ सन्निधिः साधुतायाः ॥४॥ निलयं मङ्गलानाम् ॥५॥ वसुधानिधिर्बुधविबुधानाम् ॥ ६ ॥ आधारो निराधारधरासुराणाम् ॥ ७ ॥ स्तुतो वस्तुते[3]ऽस्तगिरिः समस्ताशस्तवस्तूनाम् ॥ ८ ॥ आलयः कलाकलापस्य ॥ ९ ॥ अविषयोऽशेषकलुषविषयाणाम् ॥ १० ॥ श्रेयानश्रान्तमाश्रयोविश्वविश्रान्तिश्रेणीनाम्॥ ११॥ तत्त्वं सत्त्वस्य ॥ १२ ॥ मुख्यैः[5] सखा नित्यसत्यस्य ॥१३॥ क्षेत्रमक्षयक्षमायाः ॥ १४ ॥ अक्षुण्णः क्षमायाम् ॥ १५ ॥ ब्रह्मायमानो महामोहा[6]न्धकारधारायाः ॥ १६ ॥ अग्रगण्योऽगण्यगुण्यपुण्यवताम् ॥ १७ ॥ मूर्द्धन्यो[7] धन्यानाम् ॥१८॥ वरेण्यः शरण्योऽनन्यशरणानाम् ॥ १९ ॥ चारुचिन्तामणिर्याचकनिचयचिन्तितानाम् ॥ २० ॥ अकलितः कलिकालकालानलज्वालाजालानाम् ॥ २१ ॥ निकषोपलः सकलशास्त्रनीलोपलानाम् ॥ २२ ॥ सुवर्णवर्णनीयो लब्धवर्णसुवर्णानाम् ॥ २३ ॥ कर्णवद[8]भ्यर्णमाकर्णनीयः कर्णैः सुवर्णदानेन ॥ २४ ॥ अनभिमुखो निखिलविषयसुखानाम् ॥ २५ ॥ समूलोत्खननः समुच्छृंखलखलतानाम् ॥ २६ ॥ शोषको रोषदोषसिन्धोः ॥ २७ ॥ अनायत्तो विपत्तेः ॥२८॥ आरादरातिरविरतेः॥ २९॥ विमतस्ततानां मत्तानाम् ॥३०॥ संमतः सुमतीनाम् ॥३१॥ अखण्डखण्डकृदीननदीनपीनदैन्यसैन्यस्य ॥ ३२ ॥ मूलमनुकूलतायाः ॥ ३३ ॥ अभूमिर्दुरभिमानस्य॥ ३४॥ अस्थानं दुरवस्थानाम् ॥३५॥ स्थाने स्थानं सद्व्यवस्थानाम् ॥३६॥ भिदुरभिदुरः प्रभूतसंभूतभूतभीतिभूरिभूरुहाणाम् ॥ ३७ ॥ अदत्तावकाशः प्रमत्तानाम् ॥३८॥ संभूतिः शुभाचारभाणाम् ॥ ३९ ॥ आकरः[10] सदाचाररत्ननिकराणाम् ॥ ४० ॥ रत्नाकरो नूतन[11]-

---

१. B om. गर्व. २. AC add कृतादद्भुतपरोपकारसंतार्पित after महोदर. ३. AC om. वस्तुतो. ४. C श्रेयान् श्रातानां. ५. AC मुखसखा°. ६. C om मोहा. ७. A धूर्मण्यो for मूर्द्धन्यो. ८. BC read कर्णवदभ्यर्णावभ्य°. ९. B भिदुराभदुरः. १०. A आकारः. ११. C नून्न for नूतन.

परोपकाररत्नानाम्[1] ॥ ४० ॥ सनाभिः पद्मनाभस्य ॥ ४१ ॥ नाभिश्चातुर्य-चक्रस्य ॥ ४२ ॥ उत्तरोत्तरोपचीयमानबृहत्तरोपशमतरोर्मूलम् ॥ ४३ ॥ कूलं कल्याणकलाकौशलकुलीनतासमुल्लोलकल्लोलमालाकलितकल्लोलिनीका-न्तस्य ॥ ४४ ॥ संवर्धको[2] विशुद्धधीसमृद्धीनाम् ॥ ४५ ॥[3] अनन्तासन्तानो-ऽनन्तायितसंतापह्रदनन्तामण्डलस्य ॥४६॥ शुण्डीखण्डनकृदखण्डपाखण्डखण्डस्य ॥ ४७ ॥ संमुख्यो[4]ऽसंख्यसांख्यसंख्यावताम् ॥४८॥ पतञ्जलिप्राञ्जलः पातञ्जले सामञ्जस्येन ॥ ४९ ॥ मांसलो मीमांसायाम् ॥ ५० ॥ निःशेषविशेषज्ञो वैशेषिकाशेषविषयाणाम् ॥ ५१ ॥ सर्वोत्तमो वित्तमो[5] गौतमो[6]क्तिषु ॥ ५२ ॥ नितान्तकान्तः सकलवेदवेदान्तवेदानाम्[7] ॥ ५३ ॥ माननीयः[8] पाणिनीयानाम् ॥ ५४ ॥ ध्रुवमहीन्द्रोक्तिवित्सु महीमहीन्द्रः ॥ ५५ ॥ काव्या-धिकः काव्यादिषु ॥ ५६ ॥ आर्य आचार्यः पाराशर्यवर्यवचनेषु ॥ ५७ ॥ धुर्यश्चातुर्यभाजाम् ॥ ५८ ॥ अविस्मृतिः स्मृतिषु ॥ ५९ ॥ सुरेन्द्रः श्रीकवीन्द्रो यतीन्द्रः भूसुरेन्द्राणाम्[9] ॥ ६० ॥

स्वामिपण्डितानाम्[10] ॥

१. त्वत्कीर्त्तिकर्पूरसुपूरगन्धलिप्ता यदि स्युर्न दिशः कवीन्द्र ।
सुराः किमाभिष्परिभोक्तुकामास्तदा किमित्यप्सरसस्त्यजेयुः[11] (?)॥ २८१

२. कवीन्द्र त्वद्गुणान्वक्तुं रसना संकुचत्यतः ।
करदानभियां पुंसां करदानं करोषि यत् ॥ २८२ ॥

वीरेश्वरभट्टानाम् ॥

१. वाराणस्यां प्रयागादिषु च बहुषु किं[12] तीर्थजातेषु जन्तो-
र्यात्रा जायेत जातु स्थविरशिशुजनानाथदीनादिकस्य ।
कालेऽस्मिन्घोररूपे कलिकलुषभयेनावतीर्णो यदि स्यात्
साक्षाद्धर्मस्वरूपो निखिलजनहितः श्रीकवीन्द्रो यतीन्द्रः॥ २८३ ॥[13]

---

१. AB यत्नानाम् for रत्ना°. २. Emendation AB समर्द्धको. C सधर्मको. ३. A adds पतञ्जलि प्राञ्जलयः before अनन्ता°. ४. Emendation for सन्मुख्यें, A om. 49 and repeats 56, C om 49. ५. C विनमो. ६. C om गौतमो. ७. C वेदान्तकानाम्. ८. C मननीय. ९. B om भ. १०. AC स्वामिनां; ११. A श्वरसत्यजेयुः, B °मस्त्यजेयुः १२. C om किं. १३. A om verse 283

२. वाराणसीप्रयागावुभौ जनैर्जगति यावति ख्यातौ[1] ।
तावति कवीन्द्रकीर्तिर्मनोज्ञमूर्तिर्नरीनर्ति ॥ २८४ ॥
३. तीर्थराजस्य काश्याश्च कवीन्द्रस्य च संप्रति ।
अभिधानत्रयं लोके साहचर्येण गीयते ॥ २८५ ॥
४. श्रेयः कुर्युः कियन्नाम स्वदेहैर्यतयः परे ।
तत्पराद्धं परद्वारा कवीन्द्रः कुरुतेऽन्वहम् ॥ २८६ ॥

कूर्माचलीयराजकीयभवदेवपण्डितानां पद्यानि ॥

१. आमलयमाहिमालयमामकरालयं धरावलयम् ।
आस्ते व्याप्य कवीन्द्रो निजया कमनीयया कीर्त्या ॥ २८७ ॥

तेषामेव

१. विद्वांसो विश्वविद्या अपि विविधधियो लाघवं युक्तियुक्तम्
स्वीकृत्य स्वीयपक्षं गुणगणसरसं संगिरन्तेऽति[1] तुष्टाः ।
अन्योन्यं गौरवेण प्रतिहतमिति ये सोपहासं त्यजन्ति
त्वत्तस्ते गौरवं स्वं सदसि समधिकं प्रार्थयन्ते कवीन्द्र ॥ २८८ ॥

पुनर्भैरव्याभट्टानाम् ॥

१. धेनुर्मेऽनुत्तमा सा कनकगिरियुतः कल्पशाखी मतोऽल्पो
भोजोऽनोजस्क एवं बलिरपि न बली विक्रमो विक्रमी न ।
कर्णोऽनाकर्णनीयो भवति तव पुरो दत्तवित्ताम्बुराशे
स्वस्ति श्रीमत्कवीन्द्र त्वमिह मिहिरवद्भाससे स्वप्रभावैः ॥२८९॥
२. नाना वागीशरम्या कविकुलकलिता मन्दमास्कन्दयन्ती
भास्वद्विभ्राजमाना द्विजपतिलसिता निस्तमस्का विकेतुः ।
विस्फूर्जन्मङ्गलौघा विविधबुधयुता यत्सभा भूतलेऽस्मिन्
सोऽयं श्रीमत्कवीन्द्रो जगति विजयते जाग्रदुग्रप्रतापः ॥२९०॥
३. कुन्दात्काशाच्च कोकात्कलिकलुषहरात्कोत्करात्कुण्डलीशात्
कौमुद्याः क्षीरवार्द्धेः करकनिकरात्च्छत्रकुम्भीन्द्रतोऽपि ।

---

१. C om ख्यातौ. २. C संसरंतोऽपि. ३. AC मौजो°. ४. A विजयति. ५. AB °रिकरा°.

कर्पूरात्कामपालात्सितकमलचयाच्छ्रीकवीन्द्रस्य कामं
कैलासात्कामशत्रोरपि कलितकथाः कीर्तयः कौ लसन्ति ॥ २९१ ॥

४. शीलं नो परिशीलितं किल कलौ दानस्य दानं मुहु-
र्दृष्टं शौर्यमपि प्रवर्जितमथो लज्जा समुज्जासिता ।
कौलीन्यं प्रविलीनमेव धरणौ चोद्धत्यमूद्धूनितं
शीलाद्यं सकलं विहाय सकलं श्रीमत्कवीन्द्रं श्रितम् ॥ २९२ ॥

५. श्रीमत्त्वं गुरुतां[1] कवित्वमपि च श्रीशङ्करत्वं तथा
शौर्यं च द्विजराजतां बुधगणेशत्वं शिवाकारताम् ।
एकस्त्वं तु[2] वहस्यदोऽखिलमतश्चित्रं जनानां पुन-
र्नानात्रैव पवित्रचित्तमपि[3] नो यच्छ्रीकवीन्द्रः कृती ॥ २९३ ॥

६. शिवा भवतु भूतये स सविता वितीर्यात्प्रजाः
शिवो जनयताच्छिवं गणपतिः पतित्वं नृणाम् ।
प्रयच्छतु[4] विचक्षणः क्षितिपते कवीन्द्राय ते (?)
हरिर्हरतु कल्मषं कलिभुवां तवैवाख्यया ॥ २९४ ॥

७. मायूरीं मर्दयन्ती मृदुपदरचना न्यासतो भूतलेऽस्मिन्
चौरीं संचूर्णयन्ती सुरुचिररसभृत् सच्चमत्कारचार्वी ।
माघं संघर्षयन्ती कविकुलजयिनी मां च रोमांचयन्ती
यद्वाणी भाति भूयस्त्रिभुवनभवनोद्दीपिका दीपिकेव ॥ २९५ ॥

८. समुद्रोऽयमद्रोहि[6] कुम्भोद्भवश्रीः
समुद्रोप्यमुद्रोसि[7] मद्रोच्चयस्ते ।
निर्जद्रोणसंग्रामनैपुण्यभूम्नो[9]
कृतद्रोणवर्णाभृ[10]द्भूपालभूमन् (?) ॥ २९६ ॥

९. स्फुरद्रोमरुद्रोपमस्फीतकीर्ते[11]
लसद्रोहितांघ्रे ग्र(ग ?)लद्रोहितश्रीः ।
चलद्रोहितांभोरुहद्रोहिनेत्रं[12]
समुद्रोपमस्त्वं समुद्रो वसेन्न[13] ॥ २९७ ॥

---

१. AC कवितां. २. C च for तु. ३. C om चित्त. ४. B प्रयन्तु. ५. C °भवं. ६. C समुद्रोप°. ७. C °मुद्रोस्ति. ८. B जित°. ९. B भूम्र, C भून्ना. १०. B वर्णारि. ११. C रुद्राय°. १२. B °नेत्रः. १३. B च सेत्र, C वसेत्र.

१०. प्रभावतः परं प्रभो सदा शिवाप्रभावतः
परो हितोदयस्य ते भवेत्परो हितोदयः ॥ २९८ ॥

११. शुभं तव यशो भाति न यशो[1] भाति च क्षितौ ।
तेजसः काः कथा(थाः ?) कथ्या अयशस्ते खपुष्पवत् ॥ २९९ ॥

१२. साम्राज्यं प्राज्यमेवं क्षितिधरनृपतेः कन्यकाधन्यकाचित्
देयात्ते याचकाय प्रहरतु निखिलान्विघ्नहन्तैव[2] विघ्नान् ।
मित्रो मित्रोदयं ते कलयतु सततं श्रीपतिः श्रीपतित्वं ।
शत्रूणां भस्मभावं त्वरितमभिमतं कामशत्रुः करोतु ॥ ३०० ॥

१३. श्रीमत्कवीन्द्र नृपसम्भवदानवार्ता
विद्वत्सु शत्रुषु च तुल्यतरैव[3] भाति ।
एकत्र भूरितरवारिनिपातयोगात्
गङ्गां[4] भवत्यपरतो[5] रुधिरौघसिन्धुः ॥ ३०१ ॥

१४. काशा न पूर्णा तव दर्शनेन काशा न पूर्णा यशसा तवैवम्[6]
काशाधिकाशा तव कीर्तिरेषाँ काशाजुषस्ते तव वैरिवर्गाः[7] ॥ ३०२ ॥

१५. कीर्तिवल्ली मतल्ली ते मल्लीवल्लीव शोभते ।
सुधाधवलवापीन्दुर्भाति पुष्पाणि भान्ति च ॥ ३०३ ॥

१६. बाणं बाणवदेव दिक्षु सगुणः क्षिप्रं क्षिपन् भ्राजते
कृष्णं चौरमुरारिदण्डिजयदेवाख्यं च नारायणम् ।
दासत्वं लभते स कोऽपि सुभगः श्रीकालिदासः कविः
श्रीहर्षं च विहर्षयन् विजयते श्रीमत्कवीन्द्रः कृती ॥ ३०४ ॥

१७. श्रीमच्छ्रीभवभूतिभूतिमभितः प्रोद्भावयन् भूरिशः
श्रीमद्भारविभारतीमभिनवां गौर्वर्द्धनीं[8] वर्द्धयन् ।
श्रीमन्मोहनपाठकं प्रमदयन् श्रीमत्कवीन्द्रः कृती
प्रोद्दामं दमयन् ध्रुवं श्रुतिधरानुद्धूनयन् भ्राजते ॥ ३०५ ॥

१८. भट्टं कृष्णबुधं तथा हरिहरं प्राभाकरं डिण्डिमं
श्रीरामं कविरत्नमण्डनमहावाणीविलासादिकम् ।

---

१. B नृयशो. २. C °न्तेव. ३. C °परैव. ४. A मृज्ञा. ५. C योगावनत्य-वरतो. ६. B तवैव. ७. C °र्गेका. ८. B° युज°; C° युष°. ९. A गो°.

रुद्रं किं च तथा च लक्ष्मणकविं पञ्चाननं वाहिनी-
पत्यन्तं[1] कविराजकेसरिमुखं विस्मापयन् भ्राजते ॥ ३०६ ॥

१९. यावच्चन्द्रो दिनेन्द्रो धरणिरपि धनेन्द्रो गिरीन्द्रो गजेन्द्रो
योगीन्द्रो[2] भात्युपेन्द्रो निभृतमथ फणीन्द्रो गणेन्द्रो[3] महीन्द्रः[4] ।
तावच्छ्रीमान्कवीन्द्रः क्षितिपतिविजयी जीवतादस्ततन्द्रो
मन्द्रोद्यत्कान्तिराशीर्भिरिह भुवि भृशं श्रीद्विजेन्द्रोदिताभिः ॥३०७॥

२०. यदीयरसनागृहे सकलशास्त्रनार्योऽनिशं
वसन्ति[5] विलसन्ति वा परिहसन्ति चान्द्रीः कलाः ।
विरोधमवधूय किं समवधूतदोषाः स्फुटं
प्रभूतपरमार्थकः[6] स कविवासवो भासते ॥ ३०८ ॥

२१. काणादे कणभुक् पतञ्जलिरसौ प्रायेण पातञ्जले
सांख्ये श्रीकपिलः किलेति कलितं लोकेन लोकोत्तरः ।
श्रीव्यासोऽप्यथ चैष जैमिनिमुनिर्वेदान्तमीमांसयो-
र्न्याये गौतम एवं केवलमसौ श्रीमत्कवीन्द्रो यतिः ॥ ३०९ ॥

२२. जरीहर्ति जाड्यं जनानामजस्रं चरीकर्ति लोकेषु कारुण्यमुच्चैः ।
दरीस्थो हृदा संदरीधर्ति रुद्रं बरीभ(Av)र्ति विश्वं समन्तात्कवीन्द्रः॥३१०

२३. जरीहर्त्यघं निर्जरीभावमाप्तश्चरीकर्ति कं स्वश्चरीस्तूयमानः ।
दरीस्थो हृदा संदरीधर्ति रुद्रं बरीभर्ति विश्वं समन्तात्[7] कवीन्द्रः॥३११॥

२४. समुद्योतते योऽनवद्योऽतिविद्यो[8]
विद्योत्तमं ब्रह्मविद्योत्तमश्रीः ।
सदा साध्यमानोऽथ[9] विद्यावदाद्यो
निदाघो मुहुर्गद्यपद्यैः कवीन्द्रः ॥ ३१२ ॥

२५. प्रभावः केन वर्ण्या सा यत्प्रभावो न शक्यते ।
गिरा वक्तुं महाशक्तिं विरक्ततरसत्तमाः[10] (?) ॥ ३१३ ॥

---

१. A यत्यन्तं. २. B गौरीन्द्रो. ३. C महेन्द्रो. ४. B महेन्द्रः. ५. A लसन्ति. ६. AB °काः. ७. C पञ्च for एव. ८. B समेताद्यतीशः. C समन्ताद्यतीशः. ९. BC वरीयान्. १०. B सद्यो. ११. BC °साध्यः १२. C °क्तिं नरसत्तमाः.

२६. ब्रह्म यो वेद वेदान्तं तं वेदान्तं विचिन्तये ।
काशीं[2] संकाशयन्नृणां शङ्काशतविनाशनः ॥ ३१४ ॥

२७. अदभ्रभ्रमाभ्रप्रविभ्रंशवातो महातोषकारी यतिः श्रीकवीन्द्रः ।
समानोऽखिलप्राणिषु भ्राजमानोऽभिमानोऽपि नो यस्य कस्तत्समानः ३१५

२८. कनिष्ठो ह्रसिष्ठो लघिष्ठो दविष्ठो महेन्द्रो महीन्द्रो मुनीन्द्रोऽप्यहीन्द्रः ।
यतः संयतः श्रीगुणीन्द्रो यतीन्द्रो वरीवर्ति सर्वोपरि श्रीकवीन्द्रः ॥३१६॥

कस्यापि

१. प्रशस्ताकृतिर्यः समस्तारिजेता कवीन्द्रः कवीन्द्रो मुनिव्रातनेता[3] ।
तपश्चर्यया यः स्वयं[4] स्वर्णरेता यतिर्भ्राजते[5] सन्मणिस्वच्छचेताः ॥ ३१७ ॥

२. गलन्मत्सरोऽलं परब्रह्मवेदी विदामत्रसन्देहसन्दोहभेदी ।
कवीन्द्रः[6] कृती भूरिभूभृच्छुभायां सभायां[7] स भूर्जम्भजेतुर्विभाति[8] ॥३१८॥

३. सुवन्द्यो यतिर्गद्यपद्यादिहृद्याः प्रशस्ताः समस्ताश्च संपाद्य विद्याः ।
यशःपूरकर्पूरसान्द्रः कवीन्द्रः कलाभिः कलौ निर्मलाभिर्[9]विभाति ॥३१९॥

४. प्रजाते प्रभौ सानुगे सानुरागे करं दुःकरं देवयागे प्रयागे ।
सुचेताः शुचिः काञ्चनैर्मोचयित्वा वितन्द्रो मुनीन्द्रः कवीन्द्रो विभाति ॥

५. स्वकीयार्थमेकं समुद्दिश्य यत्नादनेके महान्तोऽपि ते ते यतन्ते ।
कवीन्द्रस्तु संप्राप्तपुण्यप्रशस्तिर्नृलोकेऽस्ति लोकोपकारार्थमेकः ॥३२१॥

६. दृढं योऽत्र दिल्लीपतिप्रीतिपात्रं मुहुः स्वर्द्धुनीस्नानसंशुद्धगात्रः ।
पवित्रः परित्रातसत्पात्रमात्रो[10] विनिद्रोऽस्ति संवित्समुद्रः कवीन्द्रः ॥३२२

७. सदा वन्द्यपादोऽविमुक्तस्थितानां गुरुर्यश्च पुण्ये पथि प्रस्थितानाम् ।
गुणप्रोल्लसत्सूक्तिमुक्तासमुद्रश्चिदानन्दसान्द्रः कवीन्द्रश्चकास्ति[11] ॥३२३॥

८. प्रयागागतस्नानपुण्याम्बुपूरैः समुत्पाद्य सत्कीर्तिवल्लीमतल्लीः[12] ।
पवित्रोरुगोत्रः सुरत्राणकारी सुरत्राणसंसत्कवीन्द्रो[13] विभाति ॥३२४॥

---

१. BC तं वै. २. AC काशी. ३. A °नेत्रा. ४. AB om स्वयं. ५. C यतो भ्राजते. ६. AC om कवीन्द्रः. ७. C add कवीन्द्र. after सभायां. ८. AC भूर्ज. ९. A om कलौ निर्मलाभिः. १०. A °मात्रो. ११. A omits सूक्तिमुक्ता to समुत्पाद्य in verse 324. १२. AC °तल्लीं. १३. E सहान्दीन्द्र, C शहाद्वीन्द्र.

९. लसद्रसालंकृतिरुल्लसन्ती वसत्प्रसादा(द)रलीलयैव ।
वाणी कवीन्द्रस्य मुनेः कवीन्द्रशिरोमणेरेति शिरोमणित्वम् ॥३२५॥

१०. दैत्यारिसेवोपचितोचितश्रीः सुष्वाप[1] यो दक्षिणसन्मुखस्थैः[2] ।
इनान्तिकेप्युत्कटकायकान्तिर्जीव्या(AC या)त् कवीन्द्रः कविरद्भुतो-
ऽयम् ॥३२६॥

एते रघुनाथभट्टगुर्जरस्य ॥[3]

---

१. सखाय यो. २. AC °मुकस्था. ३. B gives the following colophon (which is omitted in AC) and AC have 35 additional verses (see appendix) which are wanting in B. श्रीसर्वविद्यानिधानकवीन्द्राचार्यसरस्वती-कृतं कवीन्द्रचन्द्रोदयपुस्तकं कवीन्द्रचन्द्रोदयः ॥ लिःशावलदाशकाऐस्थ (कायस्थ) संवत् १७३४ सभ्ये नाम फागुन सुदी दुइजीवारमङ्गलशुभमस्तुः ॥ यादृशं पुस्तकं दृष्ट्वा तादृशं लिखितं मया । यदि शुद्धमशुद्धं वा मम दोषो न दीयते ॥

APPENDIX

The following verses are found in AC and are wanting in B

यस्तावद्दशकृत्व इत्यवतरद्धर्मो विलीयेत मा
स्वात्मानं विनियुक्तवानथ पुनस्तद्रक्षणायाधुना ।
त्वां सर्वोपकृतौ कवीन्द्र कृतवान् सत्यप्रतिज्ञं तथा
दौर्जन्यार्णवमग्नसज्जनसमुद्धाराय नारायणः ॥ १ ॥

श्रीकाशिका कापि पुरारिनायका
धन्येन येन त्रिजगत्प्रमोचिता ।
अमोचि यत्नाद्यवनेशदुष्करा(त्)
कवीन्द्रनामा स विराजतेतराम् ॥ २ ॥

नानात्वे सत्यनानात्वं येन निर्णीयते धिया ।
स चित्स्वरूपो जयति श्रीकवीन्द्रसरस्वती ॥ ३ ॥
एकोऽप्यनेकतामेति सद्विवेकसुरद्रुमः ।
कवीन्द्राशयसेकेन तं विना कं परं स्तुमः ॥ ४ ॥
बीजं स्पर्शसुखस्य यत्र परमं संबो(C यो)धनं सद्विधे
मुख्यं शब्दनिरूपकं शिवमयं लिङ्गं परं राजते ।
श्रीरूपं त्रितयं तदिन्द्रसहितं सत्यं[1] तुरीयास्पदम्
तन्नामात्र सरस्वतीवरयुतं श्रीधामजीयाच्चिरम् ॥ ५ ॥
नाकेशेनापि साकं गुरुगुरुपदभाक् दैवपाकाद्विनाकः
स्यान्निश्चेतुं समर्थो जगति वरमतिस्तत्कवीन्द्रं विना कः ।
येनासौ जीवलोकः सुखमनुभविता सद्गुणालंबिकस्त-
द्वन्दे सस्वरूपं (?) परमहममलं ज्ञानसंभाविना कः[2] ॥ ६ ॥
आनन्त्यं भजते न वस्तुगतिभिः सत्यप्रतीतिं पुन-
र्नानाकारमुपाधिभिः खलु निराकारां विकारायुताम् ।
श्रुत्या नेति च नेति वाङ्मनसयोर्गत्या न यन्निश्चितम्
तद्वन्दे परमात्मनः परिमितं रूपं कवीन्द्राश्रयम् ॥ ७ ॥

---

१. C. मन्यं for सत्यं. २. A om 6 cd.

यत्सर्वप्रतिभं विभाति विभवप्रारब्धभावं भवे
भावाभावविभावभावि भुवि यद्भव्यं मतं भावुकैः ।
अव्योम्नो विलसद्विलासममलं व्योमत्वमभ्येति यत्
तद्रूपं परमात्मनो मम मतं वन्दे कवीन्द्राश्रयम् ॥ ८ ॥

अन्तः सञ्चारचारी स्फुरति परिचय[1]ी चेतनाचेतनानाम्
स्वाहं[2]ताचिन्त्यचिन्त[3]ासिचयपरिचि[4]तापञ्चपञ्चोपचारः ।
यस्यायं चित्प्रपञ्चः प्रचयविचयवान् सोचिराचारचारु-
स्तद्रूपं श्रीकवीन्द्रैः करबदरचितं के परेऽत्रोपचर्याः ॥ ९ ॥

सोऽहं विष्णुः शिवोऽहं विधिरहममरा एत इन्द्रोस्म्यमीषाम्
त्रैलोक्यं मत्कृते वः कृतमपरमतः किं च के लोकपालाः ।
इत्थं माया यदी[5]या[6] प्रतिघटमुदिता येन तन्निश्चितं ते
रूपं सत्यं स एव स्फुरति नतिरियं श्रीकवीन्द्राय तुभ्यम् ॥ १० ॥

संभाव्य ज्ञानदीपं भवभवनभवं वस्तुभाव्यं विभाव्या-
भावं सद्भावभानोरनुभवनभवत्स्वप्रभावप्रभावान् ।
आभात्यद्वैतभावप्रभवविभववान् भावयन् भावनां स्वा-
मेको नैकेषु योऽसाविह जयति सदा कश्चिदाभासभानुः ॥ ११ ॥

दर्शं दर्शमजागतं भ्रममिमं[7] यो जागतं जागतं
स्पर्शं स्पर्शमिमां दशां दशदिशामीशित्वमीषाकरः ।
आधिव्याधिभवाभवैरिह मनो निर्विण्णतामाश्रयन् ।
जीवोपाधिमपाश्रयन्विजयतेऽनिद्रः कवीन्द्रो यतिः ॥ १२ ॥

नानाज्ञानपटावृतैर्विषयिभिर्निष्कारणैरिन्द्रियैः
पर्णैरप्यभिधीयते विषयिणां श्रीवासुदेवः प्रभुः ।
एष ब्रह्मसनातनः स पुरुषो धाता विधाता विभु-
र्व्यक्ताव्यक्तशरीरवान् विजयते श्रीमान्कवीन्द्रो यतिः ॥ १३ ॥

प्राणायामसमाधिचित्तनियमध्यानात्मसंधारणा-
ज्योतिः सूर्यविधुप्रभाप्रतिभया पश्यत्यपश्यन्निव ।

---

१. C °चया. २. C स्वातं. ३. A °चिन्त्या°. ४. C °चितः. ५. A मत्कृभेदः. ६. A दीयाः ७. A अमात्य°. ८. A°मियं.

संसारं गतसारमाकलयिता पञ्च प्रपञ्चान् परान्
पञ्चान्यैः सह पञ्चभिः स विषयैर्भिन्नश्चतुर्णां परः ॥१४॥
आविर्भावतिरोभवद्भवभवत्प्रज्ञाविजिज्ञासया
विज्ञानप्रतिभा विभाति सहसा ज्ञानस्वभावापहा ।
नानाभावविभावनानुभवित्सद्भावनाभावना[1]
त्तज्ञा(ज्ञा ?)व्यक्तरसज्ञ[2] नैव तव सा सर्वासनावासना ॥ १५ ॥
योऽहंकाररिपुः सदा निजकुलालंकारभूतः कृती
मोहद्रोहकरः परोपकृतये पुण्यार्थसन्दोहकृत् ।
सोऽहं सोहमिति प्रबोधपटुवाक् सत्यं प्ररोहांकुरो
निःसंकल्पविकल्पको विजयते श्रीमान्कवीन्द्रः प्रभुः ॥१६॥
निःसन्देहा विदेहा विदधति परितः स्वप्रकाशं समेहा
मुक्तस्नेहाः सुखेहाविकलितकलना रत्नदीपोपमेहाः ।
नेहामुत्राप्यपेहाः[3] सहृदयहृदयानेहगेहा[4] जितेहा
निस्तन्द्राः श्रीकवीन्द्रा विनयनयदशाव्याप्तसंसारगेहाः ॥ १७ ॥
आधारस्त्वं धरायाः धरणिधरधृतिर्धारणादौ समाधौ[5]
ध्यानध्येयैकसिद्धो विधिविविधविधीनादधानोऽनुपाधिः ।
साध्यासाध्यावधिज्ञो निरवधिधनदो निर्धनानां स जीया
दीक्षीपप्रीतिकारी विबुधवरविधुप्रीतिधारी कवीन्द्रः ॥ १८ ॥
कीर्तिः श्रीवाक्प्रभाभिर्जितहिमकिरणश्रीदजीवारुणाद्या
नीवारान्नाद्यपीवाकृतिगतिमतयो नैरमीवाश्रयार्थाः ।
सुग्रीवाधीशबद्धाशयनयविनयश्रीकवीन्द्रा नवीया
यूयं संमानजीवा[6] वयमथ भवतां दानजीवा भवामः ॥ १९ ॥
आहेमाचलमाहिमाचलमथालोकापलोकाचलम्
सप्तद्वीपवतीं तथा वसुमतीमासप्तरत्नाकरान् ।
शौर्यौदार्यमनस्विता न कविता दानादिशक्तिः श्रुता
दृष्टान्यत्र कवीन्द्र शास्ति भवतां काश्मीररत्नाकरैः ॥ २० ॥

---

१. C ज्ञाना°. २. C °व्यक्त°. ३. C °देहाः. ४. C °वेह. ५. C °भूति°.
६. C समायौ. ७. A विधिज्ञो. ८. C ध्यान°. ९. C नमी वा. १०. A सन्मान°.

अथ समस्या ।

त्वं तीर्थीकुरुषे जनान् गुणिजना गायन्ति युष्मद्यशो
धीवाधारकरो भवान् गुणवतां धर्माग्रवर्ती सदा ।
त्वं दाताऽसि कलौ कवीन्द्र नितरां संसारवारां निधौ
काशीवत्कलकण्ठवत्कमलवत्कर्णारिवत्कर्णवत् ॥ २१ ॥
सम्राच्छासनमाबिभर्त्ति भवतस्त्वं रासि[1] सङ्गान्निजम्
सारूप्यं हरिचन्दनैः सुरभितं श्रीमद्भपू राजते ।
दानस्निग्धकरोऽसि नृत्यति गुणस्तेऽग्रे[2] कवीन्द्रे[3] प्रभो
मालावन्मलयाद्रिवन्मलयवन्मल्लेभवन्मल्लवत् ॥२२॥
त्वं सर्वं क्षमसे तमः परिहरन् श्रीमान् सदा राजसे
वृन्दैः[4] सौमनसैर्यशोऽतिधवलं व्याप्नोति दैवं जगत् ।
हंसैरत्र वियोज्यते जडपरामर्शात्कवीन्द्र प्रभो
क्षोणीवत्क्षणदेशवत् क्षितिजवत् क्षीरोदवत्क्षीरवत् ॥२३॥
निःसंख्या भवतां गुणा निरुपमा कीर्तिः सदा वर्धते
संसारार्णवतारको मुनिसभामध्येऽसि सूतापहा ।
औन्नत्यं भजसे मुदैव गुणिनां श्रीमत्कवीन्द्र प्रभो
तारावत्तरुणोडुवत्तरणिवत्तालाङ्कवत्तालवत् ॥ २४ ॥
विश्वाज्ञानतमोहरः परनृपान् संमोहयन् सर्वशः
पृथ्वीं पात्यखिलाममोहमनसा कामाकृतिद्रोहवत् ।
जीयात्सत्फलदः सदैव विजयी दारासुकोहश्चिरम्[6]
भास्वद्वद्भृगुसूनुवद्धरतवद्धर्गाक्षिवद्भार्गवत् ॥ २५ ॥
कीर्तिस्ते नरिनर्ति शक्रपुरतः पीयूषपूरश्रवा[7]
त्वं दार्ताऽसि भवत्प्रतापतपनोल्लासाद्विकासावहा[8] ।
साधूनां वदनावलीचिदमलो[9] भासे कवीन्द्राधुना
रम्भावद्रजनीशवद्रविजवद्राजीववद्रामवत् ॥ २६ ॥

---

१. A °राशि°. २. C ये for °ग्रे. ३. A कवीन्द्रा. ४. A वंदैः for वृन्दैः. ५. A °त्तरुणेन्दु°. ६. A श्रीमत्कवीन्द्रश्चिरं. ७. C °पूरस्रवा. ८. C °सा° for °ता°. ९. A °काशाद्वहा. १०. C वि°.

त्वल्लक्ष्मीः फलदायिनी सुमनसां श्रीमद्भिरं मनो
भावत्कं[1] गुणि जीवनं तव यशोऽन्येषामसारं तु तत् ।
आदत्तं भवता शुभं प्रभवता श्रीमत्कवीन्द्र प्रभो
सीतावत्सरिदीशवत्सलिलवत्संसारवत्सारवत् ॥ २७ ॥

कारुण्यक्षीरराशिः कलिकृतकलनाकोपेतः[2] कल्पशाखी
निःसङ्कल्पो विकल्पप्रकृतिरविकृतिः प्राकृतव्याकृतिज्ञः ।
संसाराम्भोधिमग्ने कृपणनृपजने कर्णधारः कवीन्द्रैः[3]
श्रीमद्दिल्लीपतीष्टो जयति कलिरिपू रत्नशर्मादराय ॥ २८ ॥

बलं निर्बलानां स्थलं चास्थलाना-
मलं सत्कवीनामलङ्कारदाता ।
कुलालङ्कृतिस्त्वं खलाकालकाल-
स्त्वदालम्ब आलभ्यतां रत्नशर्मा ॥ २९ ॥

स्फुरच्चारुभालः सुखश्रीविशाल-
श्रितक्षोणिपालः[4] सदाशालवालः ।
उरःस्वर्णमालः सुरेन्द्रावतारः
कवीन्द्रो यतीन्द्रश्चिरं कालमास्व ॥ ३० ॥

मुक्तिदा श्रीमता युक्तिर्युक्तितो युक्तिदा सती ।
दुर्वर्णभ्रान्तिदानुक्तिः शुक्तिवत्सा परोदिता ॥ ३१ ॥

गर्वो वर्गत्वमायातो मोहो होमत्वमागतः ।
कवीन्द्र तव संसर्गान्मदेनापि दमायितम् ॥ ३२ ॥

अन्तः सन्तोषतोषो हसति रतिगतीः[5] जाग्रतीर्जाग्रतीर्यः[6]
सौवाप्नीरेव पश्यन् जनक इव पुनः किं नु[8] रामः शुकः किम् ।
किं वा व्यासः सदासौ परमशमसुखास्वादवेत्ताधिरूढः[9]
सौषुप्तिं चित्स्वरूपो जयति मुनिवरः श्रीयतीन्द्रः कवीन्द्रः ॥ ३३ ॥

---

१. A भावात्कं. २. A को पुनः. ३. A कवीन्द्र. ४. A श्रोणिपाल.. ५. A°गती. ६. A जाग्रतीयः. ७. C सै°. ८. A तु for नु. ९. A °पिरूढः.

[1]श्रीमत्कवीन्द्रकक्षणमपि तरुणायते यत्र । (?)
परिहृतहरिहृत्कमला निवसति कमला गृहे तस्य ॥ ३४ ॥

कस्यापि

कति न कवयितारः स्वार्थतत्त्वावितारः
परगुणगणनाया बाधितारः कियन्तः ।
इति मनसि विदित्वाऽकारि विश्वार्तिहन्त्रा
सकलसुकृतसारः श्रीकवीन्द्रावतारः ॥ ३५ ॥
श्रीकवीन्द्रयशोवृन्दैरिन्दुरेष तृणीकृतः ।
अन्यथा कथमत्रास्ति सन्ततं हरिणीपतिः ॥ ॥ श्रीः ॥

---

1. C omits verses 34-36.

PRATĪKA INDEX TO KAVĪNDRACANDRODAYA

N.B.—The references are to verse-numbers

अज्ञानतश्चावरणं	२१८	क इंदग्दाताभूत्	३७
अतिचतुरकला	२५९	कणादो जैमिनिर्व्यासः	१२०
अत्यादराध्ययनं	७०	कनिष्ठो ह्यसिष्ठो	३१६
अर्द्धंगे जस्स गोरी	१५०	कमनीये भवेद्रामः	१२४
अदभ्रभ्रमाभ्र	३१५	करस्य मोचनं यस्मात्	११४
अधिगतनृपमानः	१५४	करितुरगसमूहे	५८
अमुना कवीन्द्रनाम्ना	१८०	कर्णादयो वितरण	३६
अमुना चिन्तितविभुना	१५	कर्पूराभा कराभा	—on
अम्भोजं श्रीनिवासे	६४	कर्मन्दिनामिव	१६१
अम्भोधितनयाम्भोज	१९६	कलौ युगे किलायाते	१९२
अर्थं चाभीष्टहेतुं	१०१	कल्पान्तः करणप्रकाश	१९८
अवद्यजम्बाल	१०४	कल्याणप्रसरोऽस्तु	२६७
अवनिपकुलदीपे	१६४	कवयः शतशः सन्ति	१०६
अशेषवेदार्थविशेष	१८	कविकर्मधारयोऽयं	६९
अष्टादश पुराणज्ञो	११	कविकुमुदवनी	२२८
अष्टादश पुराणानि	१७५	कवीन्द्र त्वद्गुणान्वक्तुं	२८२
अष्टादशसु विद्यासु	१२१	कवीन्द्र पृथ्वीन्द्र	९२
आचार्याचार्यहंसानां	१२७	कवीन्द्रभूषणं	८१
आन्वीक्षिक्यच्छरत्ना-	२०२	कवोन्द्र विज्ञप्तिरियं	२१९
आमलयमाहिमालय	२८७	कवीन्द्रशर्मणा शर्म	१७
आसक्तिमाधुर्यविभङ्ग	१८८	कवीन्द्रस्वामिनां नाम	११९
आस्ते कोऽप्यवनीतले	१४१	,, ,, ,,	१२२
आस्ते मन्मत	६०	काणादे कणभुक्	२०४
इन्द्राधिकान् द्विजांश्चक्रे	१९३	,, ,,	३०९
इन्द्रानन्दसरस्वत्या	२६	का त्वं प्रेयसि ?	८७
उच्चैर्दशावानपि	१६३	कान्तो मुख्यप्रकार	१५९
उदयाचलचरमाचल	२४९	कामाक्षप्रथम	११८
उमेन्द्रं च केचित्	१०९	कालेनोन्मूलितः प्राक्	२०
उमेन्द्रं रमेन्द्रं	५५	कालोऽयं मृगयुः	१९५
		काशा न पूर्णा	३०२

काशीन्द्रश्रित्फणीन्द्र ३१
काश्मीरैराकचारः १७०
काश्यां श्रीकोशलायां २२३
कासारः किमु सर्वतः १५५
किं नो सन्ति सहस्रशो २२
किमधिकमधिकज्ञे ३५
कीर्तिवल्ली मतल्ली ते ३०३
केचित्काञ्चनवाञ्छया १४५
कुन्दात्काशाच्च कोकात् २९१
केचिद्वेदविदग्रणीषु १३८
कोविदव्रातकुमुद १२९
क्वचिद्बुद्धिगर्वः २००
खद्योता मिहिरन्ति २२४
गलद्दानोदककरः ८०
गलन्मत्सरोऽलं ३१८
गाम्भीर्य जलधेः ४६
गायत गोपीनाथं ९५
गीयन्ते कीर्त्तयस्ते २२२
गुणच्छटापटाच्छन्न १३५
गुणा द्रव्याण्याश्रयन्ते १०५
गोदातीरनिवासी ४
गृहे गृहे वै गुरवोऽत्र २१४
घनघनवसनान्ते २५८
चक्रेण मोचयांचक्रे १०३
चतुर्णामपि वर्णानाम् १३
चतुर्वेदीविदां श्रेष्ठः १७४
चन्द्रं चापि चकोरका ३३
चित्ते चकोरी २६६
चिन्ताप्रतानपरिचुम्बित १३९
जरीहर्त्ति जाड्यं २५
,, ,, ३१०
जरीहर्त्यंवं ३११
जाताः स्वोदरपूरकाः ५४
जोह्लाचन्द्रणअंगरा १५२
टीकाकारोऽपि नारोहति २०९
तत्कृतं यन्न केनापि ९३
तत्तच्छास्त्रप्रमेय ३८
तत्तत्संसारसारा २९
तन्द्रालु कां दिसतसे २५१
तमस्तमःसंघविघातकारी २
तर्के प्रोद्दामतर्कः २७१
तस्यैते चरणारविन्द १५८
तीक्ष्णतुण्डाः श्लक्ष्णदण्डाः २०८
तीर्थराजस्य काश्याश्च २८५
तुजविण मज पाहे २५५
तूङ्यानि साम्ये २५७
तेजोनिधिस्त्वमसि ९४
त्वं बुद्ध्या गुरुरंशुभिः १७३
त्वं बुद्ध्या धिषणोंऽशुभिः १९४
स्वं विद्याम्बुधि १८९
त्वत्कीर्तिकर्पूर २८१
स्वद्दामोद्दामनीरी २२६
त्वद्वक्त्रोत्थकवित्व १७१
दण्डिनामवधूतानां १७७
दधीचिबलिकर्णादि १३६
दयादानसविज्ञान १४
दयाशीलसन्तोष १७९
दानाधानविरागयोग २१
दार्नी कल्परुहासमान २५३
दानेनालिपतकल्प १४६
दाने राज्ये गवि क्षान्तौ १७२
दिक्कालयोर्व्योम्नि २१६

दिक्पाला: स्वसमीहितं ५९
दिल्लीश्वराय निगमागम ११५
दीनद्विजातिदारुण २०१
दुष्टाशीविषहन्ता ४३
दृढं योऽत्र दिल्लीपति- ३२२
देतसे कविवरासि मोहरा २६१
दैत्यारि सेवोप- ३२६
दैन्यध्वान्तमुदस्य ४१
द्राक्षातिरूक्षाक्षर ६७

धरायां गुणाढ्यः २३७
धर्मं धर्मधनं २७५
धर्मद्रुमः किल निदाघ ८२
धर्मे धर्मसुतो ४८
धीराधीशकवीन्द्र २७०
धेनुर्मेऽनुत्तमा सा २८९
धैर्याकूपारसीमा १४२

नमन्महीशमुकुट १३२
नरीनर्ति तर्को ५६
न स्फोटो न खलु २७७
नस्त्वागंतुकबाधकाः २७४
नाकर्णि कश्चिन्निरवर्णि ४०
नानावागीशरम्या २९०
नाप्राप्तप्रापणार्थं २७६
निखिलभुवनधाम ११२
नित्यानन्दतिदाभ २०५
निर्धनं निर्गुणं ६१
निःस्पृहता विषयेभ्यः ५

नीचीकृत्य मुकुन्दः १६१
नूनं शास्त्रसमुद्रोऽयं १९०
नो देवेषु न वासुरेषु ९७
नो भूम्यादि चतुष्टयं ६२
न्यायज्ञोऽपि न संशयं १९७

पद्माश्रयः सततशोण- २३०
परोपकृतिसाहसी १४०
पर्याय हा होय २५२
पहुवीअलएक्क १४८
पाण्डित्यं जगतीतले ९९
पाण्डित्यदण्डितोद्दण्ड १३०
पावमानं हविर्ग्राह्यं ७१
पीयूषद्रवसारिणीव २६०
पुण्डरीकाक्षचण्डांशू १
पुरी मस्तके भारती ११७
पृथ्वीशार्ककरेण ६३
प्रकाशापुरीवासि १६७
प्रकाशीकृताऽतीव २४
प्रजाते प्रभौ ३२०
प्रतापतपनः पर २६२
प्रपञ्चे निर्वेदी २३
प्रबले सकले जाते २६८
प्रभावतः परं प्रभो २९८
प्रभावः कत वर्ण्या सा ३१३
प्रयागागतस्नान ३२४
प्रशस्ताकृतिर्यः ३१७
प्रामाण्यं परतः स्वतोऽपि ८८
प्रामाण्यं वचनेषु ८९
प्रवितत्सुयशाः २३८
प्रविततसुयशाः २४५
प्राचामिवकविवाचां p. n
प्राची शचीसहचरेण २६४
प्रालेयाचलमेव ८५

बलिरथ च दधीचि ९६
बाणं बाणवदेव ३०४
बुद्धा विबुधाधिकतां ७
ब्रह्माद्वैतविभावना ५३

ब्रह्म यो वेद वेदान्तं ३१४
ब्रह्मेन्द्र पूर्णेन्द्र १७८
ब्राह्मणानां क्षत्रियाणां १७६
ब्राह्मणे द्रुतमसोढ ७५
ब्रूमः कथं तव ४५

भट्टं कृष्णबुधं ३०६
भट्टो नारायणः साक्षात् १२३
भट्टो भाट्टनये २०३
भूस्वान्तिः सन् २४०
भ्रान्तेः पुरुषधर्मत्वाद् १२८

मायूरीं मर्दयन्ती २९५
मित्रो मित्रोदयं ते ३००
मीमांसाश्रुतिमौलि ८४
मुक्तास्तु तारा २२७
मोदश्रीमान् २४१
मोदस्वारं धरायां २३१
मोदस्वारं प्रवितत्सुयशाः २३४
मोदस्वारं वितत २३२
मोदस्वारं वितत्सुयशाः २३५
मोदस्वारं श्रीमान् २३६
मोदस्वारं स भूः २४७
मोदस्वारं सर्वसंपत्तिधूर्भूः २३२
म्लायद्विद्याम्बुजाली ३०

यं पद्मनाभोऽपि १६२
यज्ज्योत्स्नाप्रसरेण २२९
यत्तत्त्वमस्या २१७
यत्पाण्डित्यपराभवा ९०
यत्पार्श्वे श्रुतिशास्त्र ११३
यथा स सर्वोपरि २७
यदा लोके लोके १४३
यदीयरसनागृहे ३०८
यदुक्तं भवद्भिः २२१
यद्दानानेकरूपाः १८५
यद्रोमकूपेषु हि २१५
यद्वाणी बाणवाणी ३४
यवनकरग्रहदुःखात् २१०
यशसामन्यनृपाणां २२५
यशः पारावारः १४४
यशःपूरकर्पूर १०७
यस्य वाक्यं विधिः ७२
यस्य वासेन सर्वस्य १८१
यः पठेत्स्पष्टमुत्कृष्टं १३७
यः साक्षात् गजराज ११६
यः कालिदासादि १८३
याति द्राक् स्थिरतां १६८
यावच्चन्द्रो दिनेन्द्रो ३०७
या विद्या प्रौढविद्या १८४
येन श्रीसाहिजाहाँ १६९
येनाखिलस्य जगतो २२०
येनामोचि महीन्द्र १८२
येनावनीशकर्णे २६५
येषां दया ब्राह्मणभूम्नि ७३
ये सन्तः पृथगाश्रयाः २७२
योगीन्द्राः क्षोणिपालाः ४९

रम्यो हरंस्तम उदेति १६५
राज्ञः कराद्ब्रह्मकुलस्य ७६
रूपे दत्तसमः ७८

लघुवयसा गततमसा ६
लसद्रसालंकृति ३२५
लोकानां प्रतिवस्तु ४४

वक्त्राम्भोजं सरस्व- ४२
वर्णी न मी तूज १५३

वाङ्माधुरीरसवशी	५२	श्रीकृष्णं व्रज सुन्दरीव	१११
वाडवार्त्यब्धिवडव	१३३	श्रीखण्डपुण्डरीकेन्दु	१३४
वाणीशा यस्य वाण्यां	२८०	श्रीमच्छ्रीभवभूति	३०५
वाराणसी प्रयागा	२८४	श्रीमत्कवीन्द्रनृप–	३०१
वाराणस्यां प्रयागा-	२८३	श्रीमत्काशिविकाशिभिः	९
वाल्मीकिः प्रथमं	२६९	श्रीमत्वं गुरुतां	२९३
विचार्याचार्यसादृश्यं	१६	श्रीमद्धन्यकवीन्द्र	१६०
विततसुयशा	२४३	श्रुतिसागरवार	१४७
विदितमहीतलतस्मै	८	श्रूयन्ते सखि यस्य	८३
विद्यानिधानकृतमान	३९	श्रेयः कुर्युः कियच्चाम	२८६
विद्यानुकृतफणीन्द्रो	३		
विद्या श्रीः कीर्तितुष्टी	६५	सच्चं कासि तुमं	१५१
विद्वद्वर्य विभो	२७२	सदलंकारविख्यातं	१९९
विद्वद्वृन्दकरीन्द्र–	९८	सदाचरणचातुरी	२६३
विद्वद्वृन्दविभूषणः	१९	सदाचारचारी	१८६
विद्वन्नैवोपमा ते	२७९	सदा वन्द्यपादो	३२३
विद्वांसो विश्वविद्या	२८८	सदाश्रितं यूयमवेत	७४
विधाय वेषवैषम्यं	१०२	सद्दारिद्र्याटवी	१३१
वृथा मधुकथा ग्रथा	२१२	समुद्योतते योऽन–	३१२
वेदात्माङ्गतनुः	५०	समुद्रोयनद्रोहि	२९६
वेदान्ता हृदयङ्गमा	५७	सर्वसंकौतुकी	२४४
वेदान्ते व्यासरूपं	२१३	सर्वसंपत्तिधूः	२३९
वैयाकरणकुम्भीन्द्र	१००	सर्वार्थः सर्वदेवासो	२७८
वैरूप्यं नरभाल	४७	सर्वोपकृतये विद्या	१२६
		सलिलनिधिकृपेचा	२५४
शशौ शरभूवह्नि	२४८	स षडङ्गचतुर्वेद	१०
शिवा भवतु भूतये	२९४	साष्टाङ्गं समहामहं	३२
शीलं नो परिशीलितं	२९२	साहित्योपेतसौहित्यो	१२
शुभं तव यशो	२९९	सुधा भवति सा मुधा	२११
शेषाशेषस्य काकोलात्	१०८	सुपत्राढ्यो द्विजिह्वारि	७९
श्रीकवीन्द्र महाराज	७७	सुरेन्द्रैः स्तुतो	१८७
श्रीकवीन्द्रयशो भाति	२०६	सुरेन्द्रोऽपि निद्रा	१५७
श्रीकामधेनु जगतीवरि	२५६	सुवन्द्यो यतिर्गद्य	३१९

सौन्दर्येण विनिर्जितो	९१	स्वामिश्रीमत्कवीन्द्रे	६६
स्फुरद्रोमरुद्रोप	२९७	स्वारं धरायां	२४६
स्वकीयार्थमेकं	३२१	स्वारं धीमान्	२४२
स्वकुलकमलभानु	५१	स्वार्थातिक्रमवर्तिनो	६८
स्वयमिह सुदशां	२०७		
स्वर्गे कल्पमहीरुहो	८६	हत्थो दे पहुवीअले	१४९
स्वस्ति श्रीनृपसाहजाह	१५६	हनूमान् भवनाशाय	१२५
स्वस्ति श्रीमदमन्द–	११०	हारं न तारं	२५०
स्वस्ति श्रीमद्विशिष्ट	२८	हृदयलसदुपेन्द्रं	१६६

PRATĪKA INDEX TO APPENDIX

अन्तः संचारचारी	९	नानात्वे सत्यनानात्वं	३
अन्तः सन्तोषतोषो	३३	निःसंख्या भवतां	२४
आधारस्त्वं धरायाः	१८	निःसन्देहा विदेहा	१७
आनन्त्यं भजते	७	प्राणायामसमाधि	१४
आविर्भावतिरोभवत्	१५	बलं निर्बलानां	२९
आहेमाचलमाहिमा	२०	बीजं स्पर्शसुखस्य	५
एकोऽप्यनेकतामेति	४	मुक्तिदा श्रीमता युक्ति	३१
कति न कवयितारः	३५	यत्सर्वं प्रतिभं	८
कारुण्यक्षीरराशिः	२८	यस्तावद्दशकृत्य	१
कीर्त्तिस्ते नरिनर्त्ति	२६	योऽहंकाररिपुः	१६
कीर्त्तिः श्रीवाक्प्रभाभिः	१९	विश्वाज्ञानतमोहरः	२५
गर्वो वर्गत्वमायातो	३२	श्रीकवीन्द्रयशोवृन्दैः	२६
त्वं तीर्थीकुरुषे	२१	श्रीकाशिका कापि	२
त्वं सर्वं क्षमसे	२३	श्रीमत्कवीन्द्रकक्षण	३४
त्वल्लक्ष्मीः फलदायिनी	२७	संभाव्यं ज्ञानदीपं	११
दृशं दर्शमजागतं	१२	सम्राच्छासनमाबिभर्ति	२२
नाकेशे नापिसाकं	६	सोऽहं विष्णुः शिवोऽहं	१०
नानाज्ञानपरावृतैः	१३	स्फुरच्चारुभालः	३०
